मूर्ता-ऽमूर्त-ममोघ-मूर्तिममलं ज्योतिःप्रदीप्तोज्ज्वलं
साक्षात् षोडशवर्णपत्रकमले जीवं परं चिन्तयेत्॥५॥

इति कण्ठे जीवं ध्यात्वा, मानसोपचारैः सम्पूज्य, 'अं नमः हंसः सोऽहम्' इत्यादि 'अः नमः हंसः सोऽहं' इत्यन्तमुक्त्वा

अभय मुद्रा को धारण किये हुए हैं तथा जो कंकड़, ग्रैवेय, विजायठ, हार, नूपुर तथा व्याघ्र चर्म धारण किये हुए हैं, इस प्रकार शिव-स्वरूप का हृदय-स्थान में ध्यान करे॥ ४॥

पश्चात् मानसोपचार से उनका पूजन करे, फिर 'कं नमः हंसः सोऽहं' से प्रारम्भ कर 'ठं नमः हंसः सोऽहं' पर्यन्त अक्षरों के द्वारा पूर्व दिन में किये गये ६००० संख्याक अजपा जप को 'अनाहतस्थित-शम्भवेऽहं निवेदयामि' कहकर समर्पित करे। तदनन्तर,

'अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, लृ, ॡ,' से 'ए, ऐ, ओ, औ, अं अः' इन षोडश वर्णरूप दलों से बने हुए कमल पर निराकार रूप से विराजमान, जगत् में व्याप्त होकर भी जगत् के कारणस्वरूप, सूक्ष्म से भी सूक्ष्मतर, वैराग्य मिश्रित सगुण तथा निर्गुणस्वरूप, मूर्त एवं अमूर्तस्वरूप, स्वच्छ ज्योति से जगमगाते हुए जीव का ध्यान करना चाहिए॥ ५॥

इस प्रकार कण्ठस्थान पर जीव का ध्यान करता हुआ 'अं

पूर्वदिनकृत-सहस्रमजपाजपं विशुद्धिस्थित-जीवायाऽहंज निवेद-यामि' इति पठित्वा, समर्पयेत् ।

ह-क्षाभ्यां परिक्लृप्त-पत्ररचिते पद्मे जगत्कारणं
विश्वोत्तीर्णमनेक-देहनिलयं विद्युद्विलासं परम् ।
तत्तद्योग्यतया स्वदेशिकतनुं सम्प्राप्तरूपं परं
प्रत्यक्षाक्षरविग्रहं गुरुपदं ध्यायेत् परं दैवतम् ॥ ६ ॥

इति भ्रूमध्ये श्रीगुरुपदं ध्यात्वा मानसोपचारैः सम्पूज्य 'हं नमः हंसः सोऽहं, क्षं नमः हंसः सोऽहम्' पूर्वदिन-सहस्र-मजपाजपमाज्ञाचक्रस्थगुरवेऽहं निवेदयामि' इति समर्प्य ।

नमः हंसः सोऽहं' से प्रारम्भ कर 'अः नमः हंसः सोऽहं' पर्यन्त अक्षरों से किये गये एवं पूर्वदिन कृत १००० संख्याक अजपा जप को 'विशुद्धिस्थित-जीवायाऽहं निवेदयामि' कहकर जीवस्वरूप परमात्मा को निवेदित करे। तदनन्तर,

'ह' से लेकर 'क्ष' पर्यन्त अक्षररूप दलों से बने हुए कमल पर विराजमान, परब्रह्मस्वरूप गुरु का ध्यान करे। जिनका विग्रह प्रत्यक्ष अक्षरस्वरूप है, तथा जो अनेक शरीर से जगत् में व्याप्त हैं, जिनके शरीर की कान्ति विद्युत् के समान जगमगा रही है, मन्त्र की तद्-तद् योग्यता से जो साक्षात् परमेश्वर-स्वरूप हैं ॥ ६ ॥

इस प्रकार भ्रू के मध्य में गुरु का ध्यान करे, और मानसोप-चार से पूजन कर, 'हं नमः हंसः सोऽहं' से 'क्षं नमः हंसः सोऽहं' पर्यन्त अक्षरों से किये गये १००० अजपा जप को 'आज्ञाचक्रस्थ-गुरवेऽहं निवेदयामि' कहकर निवेदित करे। तदनन्तर,

विश्वस्यादिमनादिमेकममलं नित्यं परं निष्कलं
नित्योद्बुद्धसहस्रपत्रकमले आद्यक्षरैर्मण्डिते ॥
नित्यानन्दमयं समस्तमुनिभिः संवित्स्फुरच्चान्तरं
स्मृत्वाऽऽत्मानमनेक-विश्वनिलयं स्वच्छं जगत्सर्वतः ॥७॥

इति ब्रह्मरन्ध्रे परमात्मानं ध्यात्वा, मानसोपचारैः सम्पूज्य, 'अं नमः हंसः सोऽहम्' इत्यादि 'क्षं नम हंसः सोऽहम्' इत्यन्तं प्रादक्षिण्येन विन्यस्य, पूर्वदिनकृत-सहस्रमजपाजपं ब्रह्मरन्ध्रस्थित-परमात्मनेऽहं निवेदयामि' इति समर्प्य, ध्यायेत्—

हंसो गणेशो विधिरेव हंसो हंसो हरिर्हंसमयश्च शम्भुः ।
हंसो हि जीवो गुरुरेव हंसो, हंसो ममाऽऽत्मा परमात्महंसः ॥८॥

पुनः सहस्रदल के कमल पर प्रणव से युक्त आत्मा का ध्यान करे। जो विश्व का आदि किन्तु स्वयं अनादि है, जो एक, स्वच्छ, नित्य, मायारहित है, जो जाग्रत्, स्वप्न तथा सुषुप्ति से परे है एवं तुरीयावस्था में विद्यमान है, जो नित्यानन्द स्वरूप, मुनियों के जानने योग्य तथा अन्तःकरण में स्फुरित हो रहा है, जो जगत् के बाहर और भीतर विराजमान है ॥ ७ ॥

इस प्रकार ब्रह्मरन्ध्र में परमात्मा का ध्यान कर, मानसोपचार से उनका पूजन करे, 'अं नमः हंसः सोऽहं' से आरम्भ कर 'क्षं नमः हंसः सोऽहं' पर्यन्त किये गये अजपा जप को दाहिने से न्यास कर दिन के पूर्व भाग-'ब्रह्मरन्ध्रस्थित-परमात्मनेऽहं निवेदयामि' कह कर समर्पित करे। फिर निम्न प्रकार से ध्यान करे—

गणेश हंस हैं, ब्रह्मा हंस हैं, श्री हरि हंस हैं, शम्भु हंस हैं, जीव हंस हैं, गुरु भी हंस हैं, यह हमारी आत्मा हंस है तथा परमात्मा भी

देहो देवालयः प्रोक्तो जीवो नाम सदाशिवः ।
त्यजेदज्ञान-निर्माल्यं सोऽहं भावेन पूजयेत् ॥ ९ ॥

इति ध्यात्वा, जीवात्म-परमात्मनोरैक्यं विभाव्य, सङ्कल्पं कुर्यात् । 'ॐ अद्य सूर्योदयादारभ्य श्वःसूर्योदयपर्यन्तं जाग्रत्-स्वप्न-सुषुप्तिषु नासापुटित-श्वासोच्छ्वासाभ्यां सोऽहं-रूपाभ्यां षट्शतोत्तरमेकविंशत्सहस्रसंख्या-ऽजपागायत्रीमन्त्रजपमहं करिष्ये'—इति सङ्कल्प्य, देवं प्रार्थयेत् ।

त्रैलोक्यचैतन्यमयादिदेव ! कपीश ! शम्भो ! भवदाज्ञयैव ।
प्रातः समुत्थाय तव प्रियार्थं संसारयात्रामनुवर्तयिष्ये ॥ १० ॥

हंसस्वरूप ही हैं ॥ ८ ॥

यह शरीर मन्दिर है तथा इसमें निवास करने वाला जीव सदाशिव स्वरूप है, इसलिए इनकी पूजा में अज्ञान-स्वरूप निर्माल्य का मैं परित्याग करता हूँ। केवल 'सोऽहं' भावना से पूजा करनी चाहिए ॥ ९ ॥

इस प्रकार ध्यान कर, जीवात्मा तथा परमात्मा की एकता का ध्यान करता हुआ नीचे लिखा हुआ संकल्प करे। देश-काल का संकीर्तन कर, 'आज के सूर्योदय से आरम्भ कर कल के सूर्योदय पर्यन्त जाग्रत्, स्वप्न, सुषुप्ति अवस्था में नासापुट के श्वास तथा उच्छ्वास से निकले हुए 'सोऽहंरूप मन्त्र का २१६०० संख्या में अजपा-जपरूप गायत्री का जप करूँगा।' इस प्रकार संकल्प कर निर्विघ्नता के लिए देवता की प्रार्थना करे।

हे त्रैलोक्य चैतन्यमय, हे आदिदेव, हे कपीश, हे शम्भो ! आप की आज्ञा से प्रातःकाल उठकर संसार-यात्रा के लिए कार्य कर रहा हूँ ॥ १० ॥

अहं देव न चाऽन्योऽस्मि ब्रह्मैवाऽहं न शोकभाक् ।
सच्चिदानन्दरूपोऽहमात्मानमिति भावयेत् ॥११॥

संसारयात्रामनुवर्तमानं त्वदाज्ञया श्रीहनुमन्महेश ! ।
स्पर्द्धा-तिरस्कार-कलिप्रमाद-भयानि मांमाऽभिभवन्तु तात!॥१२॥

जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः ।
त्वया जगत्प्राण-हृदिस्थितेन यथा नियुक्तोऽस्मि तथा करोमि।१३।

इति देवं प्रार्थ्य, बहिर्गमनार्थं महीं प्रार्थयेत्—

समुद्रमेखले देवि ! पर्वतस्तनमण्डले ।
विष्णुपत्नि ! नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥१४॥

मैं ही देव हूँ और कुछ दूसरा नहीं हूँ, मैं ही परब्रह्म हूँ, मुझे किसी प्रकार का शोक नहीं है। मैं ही सच्चिदानन्द-स्वरूप हूँ, ऐसा ध्यान करे॥ ११ ॥

हे हनूमान् ! हे महेश ! संसार में अपने निर्वाह के लिए कार्य करने वाले मुझको आपकी आज्ञा से स्पर्धा, तिरस्कार, कलह, प्रमाद तथा भय के द्वारा कोई अनादर न प्राप्त हो॥ १२ ॥

मैं धर्म को जानता हूँ, पर मेरी उसमें प्रवृत्ति नहीं है, मैं पाप को जानता हूँ, पर उससे मेरा छुटकारा भी नहीं हो पाता। अतः हे जगत्प्राण, मेरे हृदय में बैठकर आप जैसी आज्ञा देते हैं मैं वैसा ही कर रहा हूँ॥ १३ ॥

इस प्रकार देवता की प्रार्थना कर, बाहर जाने के लिए पृथ्वी की प्रार्थना करे—समुद्ररूप मेखला तथा पर्वतरूप स्तनमण्डल से विराजमान, हे विष्णुपत्नि ! मैं तुम्हें नमस्कार करता हूँ, तुम मेरे पैर के स्पर्श को क्षमा करो॥ १४ ॥

इति प्रार्थ्य, 'ऐं' इत्युत्थाय, 'क्लीं' इति जलपात्रमादाय, नगराद् बहिः शौचादिकं कर्तुं त्रिवारं देवं च स्मरन् गच्छेत्।

इति प्रातःकृत्यं समाप्तम्।

—०—

तत्र गत्वा, जलपात्रं स्व-नैर्ऋत्यां संस्थाप्य भूत-सङ्घान् प्रार्थयेत्—

गच्छन्तु पितरो देवा ऋषयो यक्ष-राक्षसाः।
भूत-प्रेत-पिशाचाद्याः करिष्ये मलमोचनम्॥ १॥

इति प्रार्थ्य, 'लं' इति प्रादेशमात्रं भूतलं सम्मृज्य, दक्षकर्णोपवीती वसनवेष्टितमस्तको दिवा प्राङ्मुखो वोदङ्मुखो रात्रौ च दक्षिणदिङ्मुखो मौनी तत्रोपविश्य, 'क्रों' इति मध्यमा-

---

ऐसी प्रार्थना कर, 'ऐं' इस मन्त्र का उच्चारण कर शयन से उठे तथा 'क्लीं' मन्त्र का उच्चारण कर, जलपात्र लेकर, गाँव के बाहर शौच करने के लिए तीन बार अपने इष्ट देवता का स्मरण करते हुए जाये।

इस प्रकार प्रातःकाल का कृत्य समाप्त।

*

शौच के लिए नगर के बाहर अकृष्टभूमि में जाकर, अपने नैर्ऋत्य दिशा में जल को रख कर, भूत संघों की प्रार्थना करे।

पितर, देवता, ऋषि, यक्ष, राक्षस, भूत, प्रेत तथा पिशाचादि इस स्थान से दूर चले जायें, क्योंकि मैं यहाँ मलमोचन करूँगा॥१॥

इस प्रकार प्रार्थना कर, 'लं' इस मन्त्र को पढ़कर प्रादेश मात्र भूमि को स्वच्छ करे, दाहिने कान पर जनेऊ को चढ़ावे, वस्त्र से अपने सिर को ढँक कर, दिन में पूर्वाभिमुख अथवा उत्तराभिमुख, रात्रि में दक्षिणाभिमुख मौन हो शौच के लिए बैठे। 'क्रों' इस

तर्जनीभ्यां लिङ्गं धृत्वा, 'ॐ ह्रीं कपालिन्यै नमः' इति मूत्रं विसृज्य, 'ॐ ह्रीं रक्तचामुण्डायै नमः' इति मलं विसृजेत्। ततो 'वं' इति जलेन बहुमृदा च लिङ्गगुदो गन्धक्षयावधि प्रक्षाल्य, 'ऐं क्लीं श्रीं' इति करौ पादौ च प्रक्षाल्य, 'ह्रीं क्लीं ह्रीं' इति पुनः करौ प्रक्षाल्य, दन्तधावनं कुर्यात्।

दन्तधावनविधिः

चम्पा-ऽऽम्र-जम्बू-अपामार्गादिष्वेकतमं वृक्षं प्रार्थयेत्—

आयुर्बलं यशो वर्चः प्रजाः पशु वसूनि च।
श्रियं प्रज्ञां च मेधां च त्वन्नो देहि वनस्पते ! ॥ १ ॥

इति प्रार्थ्य, अष्टौ,दश,द्वादशाङ्गुलं वा विहित-वृक्षशाखोद्भवं दन्तकाष्ठं गृहीत्वा, 'क्लीं कामदेवाय सर्वजनप्रियाय नमः' इति

मन्त्र से मध्यमा तथा तर्जनी अंगुलियों के द्वारा लिंग को पकड़ कर, 'ॐ कपालिन्यै नमः' इस मन्त्र से मूत्र का तथा 'ॐ ह्रीं रक्तचामुण्डायै नमः' इस मन्त्र से मल का त्याग करे। फिर 'वं' इस मन्त्र से जल तथा मिट्टी के द्वारा गन्धक्षय पर्यन्त लिंग और गुदा का प्रक्षालन करे। फिर 'ऐं क्लीं श्रीं' इस मन्त्र से दोनों हाथों और पैरों का तथा 'ह्रीं क्लीं ह्रीं' इस मन्त्र से पुनः हाथ का प्रक्षालन करे और दातौन के लिए चम्पा, आम, जामुन तथा अपामार्ग में किसी एक वृक्ष की प्रार्थना करे।

हे वनस्पते ! आप मुझे आयु, बल, यश, तेज, सन्तति, पशु, धन, धान्य, श्री, मेधा तथा प्रज्ञा प्रदान करें ॥१॥ इस प्रकार प्रार्थना कर, आठ, दस या बारह अँगुल की दतुअन के लिए शास्त्र में विहित वृक्ष की शाखा से दतुअन तोड़े। फिर 'क्लीं कामदेवाय सर्वजनप्रियाय

दन्तान् संशोध्य, 'क्लीं'इति जिह्वामुल्लिख्य दन्तकाष्ठं प्रक्षाल्य शुद्धदेशे क्षिपेत्। ततः करौ प्रक्षाल्य, देवं स्मरन् मुखं प्रक्षालयेत्।

इति दन्तधावनविधिः ।

स्नानविधिः

ततो हनुमन्तं स्मरन् यागमन्दिरे सम्मार्जनादिकं कृत्वा, मङ्गलारार्तिकं विधाय,निर्माल्यमपसार्य, देवगुणकर्मादिकं स्मरन् स्नातुं नदीं गच्छेत् । तत्र गत्वा, 'फट्' इति तीरं प्रोक्ष्य, स्नानोपस्कारं संस्थाप्य, तर्जन्यां स्वर्ण-रजतनिर्मितां मुद्रिकां कुशमयीं वा धृत्वा, गणेशं च नत्वा, अन्तःस्नानं कुर्यात् । शिरसि सहस्रदल-कमल-कर्णिकायां विराजमानंकोटिसूर्यप्रतीकाशं निज-विविधभूषण-विभूषितविग्रहं वरा-ऽभय-कराम्बुजं श्रीगुरुं

नमः' इस मन्त्र से दाँतों को शुद्ध करे। पश्चात् 'क्लीं' इस मन्त्र से जिह्वा को साफ कर, दतुअन के छिलकों को धोकर शुद्ध स्थान में फेंक देवे। तदनन्तर हाथ धोकर इष्ट देवता का स्मरण करता हुआ मुख का प्रक्षालन करे।

इस प्रकार दन्तधावनविधि समाप्त ।

स्नानविधि-तत्पश्चात् हनुमान्जी का स्मरण करताहुआ यज्ञमन्दिर को लीपे और मंगला आरती करे। निर्माल्य को दूर कर हनुमान् जी के ज्ञान आदि गुण तथा अतुलित बलधाम आदि पराक्रम का स्मरण करता हुआ स्नान के लिए नदी में जाये। वहाँ जाकर 'फट्' इस मन्त्रसे तीर को शुद्ध करे, और वहाँ पर स्नान के समस्त सामग्री–धोती, कमण्डलु आदि को रखे और तर्जनी अँगुली में सोने,चाँदी अथवा कुशा कीअँगूठी धारण कर एवं गणेशजी का स्मरण कर, सर्वप्रथम मानसिक स्नान करे। सिर पर सहस्रदल कमलकर्णिका में करोड़ों सूर्य के समान देदीप्यमान निज विविध आभूषणों से युक्त वर तथा अभय मुद्रा को

ध्यात्वा, तच्चरणविगलिता-ऽमृतधारया-ऽन्तर्गत-सकलकलुषं प्रक्षाल्य, विशुद्धान्तःकरणो बहिःस्नानं कुर्यात्। नाभिमात्रोदके गत्वा, पुरतो हस्तमात्रं तीर्थं कल्प्य, आचम्य, प्राणानायम्य, 'क्रों' इत्यङ्कुशमुद्रया[1] तीर्थान्यावाहयेत्—

ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे!।
तेन सत्येन सकलं तीर्थं देहि दिवाकर!॥ १॥
गङ्गे च यमुने चैव गोदावरि! सरस्वति!।
नर्मदे सिन्धु कावेरि! जलेऽस्मिन् सन्निधिं कुरु॥ २॥

हाथों में धारण किये हुए श्री गुरु को स्मरण करे। उनके चरण से निकले हुए अमृत की धारा से, अपने समस्त पापों को दूर करने की भावना से अन्तःकरण के पापों को दूर कर पश्चात् बाहरी स्नान करे। नाभिमात्र जल में जाकर अपने चारों ओर एक हाथ तीर्थ की कल्पना करता हुआ आचमन करे। फिर प्राणायाम कर, 'क्रों' इस मन्त्र से अंकुश मुद्रा को बनाकर तीर्थों का आवाहन करे।

हे रवे! इस ब्रह्माण्ड के भीतर रहने वाले समस्त तीर्थ तुम्हारे किरणों से स्पृष्ट हैं, अतः हे दिवाकर! इस सत्य से इस जल में समस्त तीर्थ मुझे प्रदान करो॥१॥ हे गंगे, हे यमुने, हे गोदावरि, हे सरस्वति, हे नर्मदे, हे सिन्धो, तथा हे कावेरि! इस जल में आप

---

१. ऋज्वीं च मध्यमां कृत्वा तर्जनीं मध्यपर्वणि।
संयोज्याऽऽकुञ्चयेत् किञ्चिन्मुद्रैषा 'ऽङ्कुश' सञ्ज्ञिका॥
तथा च—
अंकुशाख्या भवेन्मुद्रा पृष्ठेनाऽनामा कनिष्ठया।
अंगुष्ठे तर्जनी वक्रा सरला चाऽपि मध्यमा॥
—मेरु०, अष्टम प्र०, श्लो० ३५

आवाहयामि त्वां देवि ! स्नानार्थमिह सुन्दरि ! ।
एहि गङ्गे ! नमस्तुभ्यं सर्वतीर्थसमन्विते ।। ३ ।।

इत्यावाह्य, 'वं' इति तीर्थानि तज्जले संयोज्य, अग्न्यर्केन्दुमण्डलानि तत्र सञ्चिन्त्य, 'वं' इति द्वादशधाऽभिमन्त्र्य, धेनु[1]-मुद्रयाऽमृतीकृत्य, मत्स्येनाऽऽच्छाद्य, 'हुं' इत्यवगुण्ठ्य, चक्रेण संरक्ष्य, 'फट्' इति छोटिकया दशदिग्बन्धनं कृत्वा, मूलेनैकादशधाऽभिमन्त्र्य, जलं नमेत् ।

लोगों का सन्निधान हो ।। २ ।। हे समस्त तीर्थों से संयुक्त सुन्दरि गंगे देवि, तुम्हें नमस्कार है। इस जल में हम तुम्हारा आवाहन करते हैं ।। ३ ।।

इस प्रकार जल में तीर्थों का आवाहन कर, 'वं' इस मन्त्र से उन तीर्थों को जल में मिलावे, सूर्य, अग्नि तथा चन्द्रमण्डल के तेज का ध्यान करता हुआ 'वं' इस मन्त्र से बारह बार जल को अभिमन्त्रित करे। धेनुमुद्रा से अमृततुल्य बना कर, तथा मत्स्य मुद्रा से जल को आच्छादित कर, 'हुं' इस मन्त्र से उसे अवगुण्ठित कर, चक्रमुद्रा से उस जल की रक्षा करता हुआ, 'फट्' इस मन्त्र से छींटे द्वारा दसों दिशाओं की रक्षा करे, फिर मूल मुद्रा से ग्यारह अथवा बारह बार जल को अभिमन्त्रित कर उसे प्रणाम करे।

---

१. अन्योन्याऽभिमुखौ श्लिष्टौ कनिष्ठाऽनामिका पुनः ।
तथा तु तर्जनी मध्या 'धेनुमुद्रा' प्रकीर्तिता ।।
—मेरु त०, अष्टम प्र०, श्लो० ३५

२. दक्षपाणि-पृष्ठदेशे वामपाणितलं न्यसेत् ।
अंगुष्ठौ चालयेत् सम्यङ् मुद्रेयं मत्स्यरूपिणी ।।
—मेरुतं०, पू० ख०, द्वि० त०

ततो जले पूर्वविभावित-चतुष्कोणे वक्ष्यमाण-हनुमद्यन्त्रं विचिन्त्य, बिन्दौ हनुमन्तं ध्यात्वा, षडङ्गमन्त्रैः पञ्चोपचारैश्च सम्पूज्य, मूलेन [1]कुम्भमुद्रया शिरसि तोयं त्रिः प्रक्षिप्य, 'ॐ ह्रौं स्वाहा' इत्याचामेत्। ततः सप्तरन्ध्राणि संरोधयन् त्रिर्निमज्ज्योन्मज्ज्य, देवं मनसि स्मरन् 'हिरण्यशृङ्गम्[2]–' इत्यादि-वैदिक-मन्त्रैस्तान्त्रिकमन्त्रैश्च स्वदेहमभिषिञ्चेत्। यथा–

हिरण्यशृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः।

तदनन्तर जल में पूर्वोक्त क्रम से उसके चारों ओर हनुमद्यन्त्र का ध्यान करता हुआ, बिन्दु में हनुमान् का ध्यान करता हुआ षंडगमन्त्रों से पञ्चोपचार द्वारा उस जल का पूजन करे। मूल मन्त्र से कुम्भमुद्रा के द्वारा शिर पर तीन बार जल छिड़क कर, 'ॐ ह्रौं स्वाहा' इस मन्त्र से उस जल द्वारा आचमन करे। पश्चात् शरीर के सात छिद्र, दो कान, दो नेत्र, दो नासिका, पुट तथा मुख को धोता हुआ तीन बार जल में डुबकी लगाये, फिर इष्ट देवता श्री हनुमान् जी का स्मरण करता हुआ 'हिरण्यशृंगम्' इत्यादि वैदिक तथा तान्त्रिक मन्त्रों से अपने शरीर पर जल छोड़े। वह इस प्रकार है—

मैं हिरण्यशृंग वरुण की शरण में हूँ, हे वरुण, मैं आप से समस्त तीर्थों की याचना कर रहा हूँ। आप मुझे समस्त तीर्थ प्रदान

---

१. मुष्ट्योरूर्ध्वौ कृताङ्गुष्ठे तर्जन्यग्रेषु विन्यसेत्।
सर्वरक्षाकरी ह्येषा कुम्भमुद्रा प्रकीर्तिता॥
अथवा

हस्तद्वयेन सावकाशिक-मुष्टिकरणे 'कुम्भमुद्रा' भवतीति बोद्ध्या।

२. हिरण्यशृंगोऽयो अस्य पादा मनोजवा अवर इन्द्र आसीत्।
देवा इदस्य हविरद्यमायन्यो अर्वन्तं प्रथमो अध्यतिष्ठत्॥
—शु० य० सं०, अ २९, मन्त्र २०

यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः ॥ ४ ॥
यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम् ।
तन्म इन्द्रो वरुणो बृहस्पतिः सविता च पुनन्तु पुनःपुनः ॥५॥
इमं मे गङ्गे यमुने सरस्वति शुतिद्रिस्तोमं स च तापरुष्ण्या ।
असिक्न्यामरुद्वृधेवितस्तयार्जीःकीयेश्रृणुह्यासुषोमया ।६।
आधारः सर्वभूतानां विष्णोरतुलतेजसः ।
तद्रूपाश्च ततो जाता आपस्ताः प्रणमास्यहम् ॥ ७ ॥
सिसृक्षोर्निखिलं विश्वं मुहुः शुक्रं प्रजापतेः ।
मातरः सर्वभूतानामापो देव्यः पुनन्तु माम् ॥ ८ ॥
अलक्ष्मीर्मलरूपा या सर्वभूतेषु संस्थिता ।
क्षालयन्ति निजस्पर्शादापो देव्यः पुनन्तु माम् ॥ ९ ॥

करें। मैंने दुष्टों का जो अन्न भोजन किया है, अथवा पापियों से प्रतिग्रह लिया है, अथवा मन, वचन और कर्म से जो भी पाप किया है, मेरे उन पापों को इन्द्र, वरुण, बृहस्पति तथा सविता नष्ट कर पवित्र करें ॥ ४-५ ॥

जो समस्त प्राणियों का आधार है, तथा जिसकी उत्पत्ति अत्यन्त तेजस्वी श्री विष्णु से हुई है, उस जल को मैं प्रणाम करता हूँ ॥६-७॥ विश्व की सृष्टि की इच्छा करने वाले भगवान् प्रजापति का शुक्र जिसमें पड़ा है तथा जो समस्त प्राणियों का पालन करने के कारण मातृस्वरूप हैं, उस जल के अधिष्ठात्री देवी को मैं प्रणाम करता हूँ ॥८॥ जो समस्त प्राणियों के भीतर रहने वाले मलरूप अलक्ष्मी का स्पर्श मात्र से ही विनाश कर उन्हें पवित्र करते हैं, उस जल के अधिष्ठात्री देवी को मैं नमस्कार करता हूँ ॥९॥ मेरे केश,

यन्मे केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्द्धनि ।
ललाटे कर्णयोरक्ष्णोरापस्तद् घ्नन्तु वो नमः ॥१०॥
आयुरारोग्यमैश्वर्यमरीपक्षक्षयं सुखम् ।
सन्तोषः शान्तिरास्तिक्यं विद्या भवतु वो नमः ॥११॥

एभिर्मन्त्रैर्मूलेन चाऽभिषिच्य, 'देवांस्तर्पयामि । ऋषींस्तर्पयामि। पितॄंस्तर्पयामि ।' इति सन्तर्प्य, वस्त्रं सम्पीड्य, क्षालयित्वा, तीरमागत्य भूतादिभ्योऽञ्जलित्रयं दद्यात् ।

असुरा भूत-वेताला कूष्माण्डा ब्रह्मराक्षसाः ।
ते सर्वे तृप्तिमायान्तु मया दत्तेन वारिणा ॥१२॥

इति दत्वा, मूलेन प्रोक्षिते धौते वाससी परिधायाऽऽचामेत्

इति स्नानविधिः ।

केशों के विन्यास स्थान, शिर, ललाट, कान तथा नेत्रों में जो पाप स्थित हैं, उसे हे जल के अधिष्ठातृ देवता, नष्ट करो ॥१०॥ हे जल ! मैं तुम्हें नमस्कार करता हूँ, आप मुझे आयु, आरोग्य, ऐश्वर्य, शत्रुपक्ष का नाश, सुख, सन्तोष, शान्ति, आस्तिक्य तथा विद्या प्रदान करें ॥११॥

इन मन्त्रों से तथा मूल मन्त्र से 'देवांस्तर्पयामि, ऋषींस्तर्पयामि, पितॄंस्तर्पयामि' इन मन्त्रों से देवता, ऋषि तथा पितरों का तर्पण करें, वस्त्र को नीचोड़ कर, उसे धोकर, तट प्रदेश में आकर, भूतादिकों के लिए तीन अंजलि जल प्रदान करे। असुर, भूत, वेताल, कूष्माण्ड तथा ब्रह्मराक्षस मुझसे दिये गये जल के द्वारा तृप्त हों ॥१२॥ इस प्रकार मन्त्र को प्रढ़कर, तीन अंजलि जल देकर, मूल मन्त्र से धोती का प्रोक्षण कर, धोती तथा अंगोछा धारण करे। फिर आचमन करे।

इस प्रकार स्नान-विधि समाप्त ।

भस्मधारणम्

ततो गृहमागत्यासनस्थः स्मार्तोत्थमग्निहोत्रोत्थं वा भस्म हस्ते गृहीत्वा, अग्निरिति भस्म । वायुरिति भस्म । जलमिति भस्म । स्थलमिति भस्म । व्योमेति भस्म । सर्वंᳫं हवा इदं भस्म । मन एतच्चक्षूंषि भस्मानि भवन्ति ।

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् ।
उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय माऽमृतात् ।। १ ।।

मानस्तोके तनये मा नऽआयुषि मानो गोषु मानो अश्वेषु रीरिषः ।
मानो वीरान् रुद्रभामिनोवधीर्हविष्मन्तः सदमित्वा हवामहे ।।२।।

इत्यभिमन्त्र्य, जलेनाऽऽलोड्य,

ॐ सद्यो जातं प्रपद्यामि सद्यो जाताय वै नमः ।
भवेभवेनातिभवे भवस्व मां भवोद्भवाय नमः ।। ३ ।।

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ।। ४ ।।

भस्मधारण—फिर घर आकर, आसन पर बैठकर, स्मार्त्त अथवा वैदिक अग्निहोत्र की विभूति लेकर 'अग्निरि' ति भस्म, 'वायुरि' ति भस्म, 'जलमि'ति भस्म, 'स्थलमि'ति भस्म, 'व्योमे'ति भस्म, 'सर्वंᳫं हवा इदं भस्म', 'मन एतच्चक्षूंषि भस्मानि भवन्ति', 'त्र्यम्बकं यजामहे', 'मानस्तोके तनये—' ।। १-२ ।। इन मन्त्रों से भस्म को अभिमन्त्रित करे, फिर जल मिला कर, 'ॐ सद्यो जातं०' से लेकर 'त्र्यायुषं जमदग्नेः०' पर्यन्त मन्त्रों से पुनः

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः।
सर्वेभ्यः सर्वसर्वेभ्यो नमस्तेऽस्तु रुद्ररूपेभ्यः ॥ ५ ॥
तत्पुरुषाय विद्महे महादेवाय धीमहि।
तन्नो रुद्रः प्रचोदयात् ॥ ६ ॥

ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माऽधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मेऽस्तु सदा शिवोम् ॥ ७ ॥

त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम्।
यद्देवेषु त्र्यायुषं तन्नो ऽअस्तु त्र्यायुषम् ॥ ८ ॥

इति मन्त्रैरभिमन्त्र्य, 'त्र्यायुषमि'ति मन्त्रेण भाले वक्षसि भुजयोर्नाभौ मूर्ध्नि च पञ्चत्रिपुण्ड्रान् धारयेत्।

इति भस्म-धारणम्।

प्रातःसन्ध्याविधिः

अथ स्व-शाखोक्तविधिना वैदिकसन्ध्यां कृत्वा, मन्त्रसन्ध्यां कुर्यात्। 'ॐ तत्सदद्येत्यादिकमुच्चार्य मम सकलदुरितक्षयार्थं

जल मिश्रित भस्म को अभिमन्त्रित करे। पश्चात् 'त्र्यायुषं जमदग्नेः' इस मन्त्र से ललाट में, 'कश्यपस्य त्र्यायुषं' इस मन्त्र से वक्षःस्थल में, 'यद्देवेषु त्र्यायुषं' इस मन्त्र से दोनों भुजा में, तथा 'तन्नो ऽअस्तु त्र्यायुषं' इस मन्त्र से मस्तक में पाँच त्रिपुण्ड लगावे।

इस तरह भस्मधारणविधि समाप्त।

प्रातःसन्ध्या—इसके बाद अपने शाखा के अनुसार वैदिक सन्ध्या कर, फिर 'तत्सदद्ये'त्यादि से 'करिष्ये' तक संकल्प वाक्य पढ़कर, मन्त्रसन्ध्या का संकल्प करे। उसका अर्थ इस प्रकार है—'देशकाल का

श्रीमद्धनुमत्प्रीत्यर्थं प्रातःसन्ध्योपासनमहं करिष्ये' इति सङ्कल्प्य। (१) 'ह्रां आत्मतत्त्वं शोधयामि स्वाहा। (२) ह्रीं विद्यातत्त्वं शोधयामि स्वाहा।' (३) 'ह्रूं शिवतत्त्वं शोधयामि स्वाहा'-इत्याचम्य, करौ प्रक्षाल्य, ओष्ठा-ऽऽस्य-करचरण-शिरांसि जलबिन्दुभिः प्रोक्ष्य, अङ्गानि स्पृशेत्। मुख-नासिके तर्जन्यंगुष्ठेन नाभिं कनिष्ठिका-ऽङ्गुष्ठाभ्यां, हृदयं करतलेन, मस्तकांसौ सर्वाङ्गुलीभिश्च संस्पृश्य, मूलेन शिखां बध्वा, प्राणायामं कुर्यात्। मूलमन्त्रेणैकेन पूरकं (१), द्वाभ्यां कुम्भकं (२), त्रिभिः रेचकम् (३)। पुनर्दक्षनासातः पुनर्वामनासातः पूरक-कुम्भक-रेचकमेवं प्राणायामत्रयं कृत्वा, वक्ष्यमाण-मूलर्ष्यादिन्यासं विधाय, स्वाग्रे

संकीर्तन करता हुआ समस्त पापराशि तथा हनुमान् जी की प्रीति के लिए मैं सन्ध्योपासन करता हूँ।' फिर 'ॐ ह्रां आत्मतत्त्वं शोधयामि स्वाहा' से आरम्भ कर 'ह्रूं शिवतत्त्वं शोधयामि स्वाहा' तक वाक्य पढ़-कर तीन बार आचमन करे। हाथ धोकर ओठ, मुख, हाथ, पैर तथा शिर पर जल को छिड़के और पुनः अंगों का स्पर्श करे। मुख और नाक का स्पर्श दोनों हाथ के तर्जनी तथा अँगूठे से, नाभि का स्पर्श दोनों हाथ की कानी अँगुली तथा अँगूठे से, हृदय को हाथ के तलवे से, मस्तक तथा दोनों कन्धों को दोनों हाथ की समस्त अंगुलियों से स्पर्श करे। फिर मूल मन्त्र से शिखा बाँधकर प्राणायाम करे। मूल मन्त्र को एक बार पढ़कर पूरक, दो बार पढ़कर कुम्भक तथा तीन बार पढ़कर रेचक प्राणायाम करे। पहले दाहिनी नासिका से पूरक, कुम्भक, रेचक करे, फिर बाँयी नासिका से पूरक, कुम्भक तथा रेचक करे। पश्चात् दाहिनी नासिका से पूरक, कुम्भक तथा रेचक इस प्रकार तीन बार प्राणायाम करे। फिर आगे कहे जानेवाले मन्त्रों से ऋष्यादि न्यास कर अपनी

वामतः पात्रं संस्थाप्य,'नमः' इति जलमापूर्य,पूर्ववत्तीर्थान्यावाह्य, 'वं' इति धेन्वाऽमृतीकृत्य, मूलेनाऽष्टधाऽभिमन्त्र्य, तज्जलं वामहस्ते गृहीत्वा, दक्षाऽङ्गुष्ठ-तर्जनीभ्यां नमोऽन्तैरकारादि-क्षकारान्त-मातृकाक्षरैः प्रत्यक्षरं शिरः प्रोक्ष्य,सशेषं तज्जलं दक्ष-हस्ते विधाय, वामकरेण तद्गलित-बिन्दुभिर्मूलेन सप्तधा तनुं सम्मार्ज्य, पुनर्दक्षकरस्थं तज्जलं वामनासाग्रमुपनीयेडयाऽऽकृष्य, देहान्तस्थं सकल-कलुषं प्रक्षाल्य, तज्जलं कृष्णवर्णं पिंगलया बहिर्निर्गतं मत्वा, स्ववामे ज्वलद्वज्रशिलां ध्यात्वा। 'ॐ श्लीं पशुं हुं फट्' इति पाशुपतास्त्रेण तस्यां निःक्षिपेत्।

बाँयीं ओर आगे पात्र रखकर, 'नमः' पढ़कर जल छोड़े और उसमें पूर्वोक्त 'ब्रह्माण्डोदरतीर्थानि' से प्रारम्भ कर, 'सर्वतीर्थे समन्विते' तक श्लोक पढ़कर समस्त तीर्थों का आवाहन करे। 'वं' इस मन्त्र को पढ़कर 'धेनुमुद्रा' से उसे अमृत के तुल्य बनावे, फिर मूल मन्त्र पढ़कर उसे आठ बार अभिमन्त्रित कर, उस जल को बाँये हाथ पर ले, दाहिने हाथ के अँगूठे तथा तर्जनी अंगुलि के द्वारा 'अकाराय नमः' से लेकर 'क्षकाराय नमः' तक पढ़कर शिर का सम्मार्जन करे, फिर शेष जल दाहिने हाथ पर रख कर, फिर बाँयें हाथ से उस जल को गिराकर, उसके बिन्दुओं से मूल मन्त्र को पढ़कर सात बार अपने शरीर का सम्मार्जन करे। फिर दाहिने हाथ पर रखे हुए उस जल को बाँयी नासिका के आगे ले जाकर, उस नासिका से ऊपर की ओर खींचे। और शरीर के भीतरी भाग में रहने वाले समस्त पापों को नष्ट कर उस जल को काला समझकर और पाप को पिंगला से बाहर निकला हुआ समझकर, बायीं ओर वज्रशिला का ध्यान करे। 'ॐ श्लीं पशुं हुं फट्' इस मन्त्र को पढ़कर पाशुपतास्त्र से उस वज्रशिला पर फेंके।

ततः करौ प्रक्षाल्य, आचम्य, अञ्जलिना जलमादाय, 'ॐ वायुपुत्राय विद्महे वज्रांगाय धीमहि। तन्नो रुद्रः प्रचोदयात्।

'रविमण्डलसंस्थाय हनुमते अर्घ्यं कल्पयामि' इति त्रिरर्घ्यं दत्वा, मूलमुच्चार्य, 'श्रीहनुमन्तं तर्पयामि नमः' इति त्रिः सन्तर्पयेत्।

ततः प्रकोष्ठयोर्मणिबन्धयोः पार्श्वयोः करतलयोस्तत्पृष्ठयोस्तदग्रयोश्च मूलं विन्यसेत्। एवं करशुद्धि कृत्वा, ऋष्यादिन्यासपूर्वकं गायत्रीं मूलमन्त्रं च यथाशक्ति जपित्वा, समर्प्य, प्रणम्य, [1]संहारमुद्रया तीर्थानि देवं च विसृजेत्।

इति प्रातःसन्ध्याविधिः।

तत्पश्चात् हाथ धोकर, आचमन कर अंजलि से जल को लेकर, 'ॐ वायुपुत्राय विद्महे' से 'हनुमते अर्घ्यं कल्पयामि' तक तीन बार मन्त्र पढ़कर हनुमान् जी को तीन बार अर्घ्य देवे। फिर मूल मन्त्र का उच्चारण कर, 'श्रीहनुमन्तं तर्पयामि नमः' इस मन्त्र को तीन बार पढ़कर तीन बार हनुमान् जी का तर्पण करे।

इसके बाद प्रकोष्ठ, मणिबन्ध, पार्श्व, करतल तथा उसके पृष्ठ भाग तथा उसके आगे मूल मन्त्र से न्यास करे। इस प्रकार कर-शुद्धि कर ऋष्यादिन्यास पूर्वक गायत्री ('ॐ वायुपुत्राय विद्महे०' इत्यादि) तथा मूल मन्त्र का यथाशक्ति जप कर, उसे हनुमान् जी को समर्पित करे। तथा संहारमुद्रा से समस्त तीर्थ तथा देवताओं का विसर्जन करे।

इस तरह प्रातःकाल की सन्ध्याविधि समाप्त।

---

१. अधोमुखे वामहस्ते ऊर्ध्वं स्याद् दक्षहस्तकम्।
क्षिप्त्वाऽङ्गुलीरंगुलिभिः संग्रथ्य परिवर्तयेत्॥
एषा संहारमुद्रा स्याद् विसर्जनविधौ स्मृता।
—मन्त्र महा०, पू० ख०, द्वि० त०

अथ देवं स्तुवन् यागमण्डपमागत्य, हस्तौ पादौ च प्रक्षाल्या-ऽऽचम्य, प्राणानायम्य, स्वशाखोक्तविधिना-ऽग्निहोत्रं विधाय, अग्नीमुपस्थाय, द्वारपूजां कुर्यात् ।

द्वाराग्रे बिन्दुत्रिकोणं कृत्वा, 'व्यापकमण्डलाय नमः' इति सम्पूज्य, 'ॐ ह्रः द्वारार्घ्यं साधयामि हुं फट्' इति पात्रं संस्थाप्य, 'नमः' इति जलमापूर्य, 'गंगे च—' इति तीर्थान्यावाह्य, 'ॐ' इति सम्पूज्य, धेन्वाऽमृतीकृत्य, मूलेनाऽष्टधाभिमन्त्र्य, तज्जलेन 'फट्' इति द्वारं प्रोक्ष्य, द्वारदेवताः पूजयेत् ।

ऊर्ध्वे—१. गं गणेशाय नमः । दक्षे—२. मं महालक्ष्म्यै नमः ।

पश्चात् इष्ट देवता श्री हनुमान्‌जी का स्मरण करता हुआ यज्ञ-मण्डप में आकर, हाथ तथा दोनों पैरों का प्रक्षालन करे। आचमन तथा प्राणायाम कर, अपनी शाखा के अनुसार अग्नि में होम कर, अग्नि की स्तुति कर यज्ञमण्डप के द्वार की पूजा करे

द्वार के अग्रभाग पर बिन्दु से त्रिकोण बनाकर, 'व्यापकमण्डलाय नमः' इस मन्त्र से त्रिकोण की पूजा करे। पश्चात् 'ॐ ह्रः द्वारार्घ्यं साधयामि हुं फट्' इस मन्त्र से पात्र स्थापित करे। 'नमः' मन्त्र पढ़कर उसमें जल भरे, 'गङ्गे च०' इत्यादि मन्त्र को पढ़कर उस जल में तीर्थों का आवाहन करे, 'ॐ' इस मन्त्र से अर्घ्यपात्र की पूजा करे, धेनुमुद्रा से उसे अमृत तुल्य बनावे, फिर मूल मन्त्र से आठ बार अर्घ्य को अभिमन्त्रित करे, पश्चात् उस अर्घ्य के जल से 'फट्' यह मन्त्र पढ़कर द्वार पर गिरा दे, और द्वार-देवता की पूजा करे।

ऊपर १. 'गं गणेशाय नमः,' दाहिने २. 'मं महालक्ष्म्यै नमः'

वामे–३. सं सरस्वत्यै नमः। दक्षे–४. विं विघ्नाय नमः। ५. गं गङ्गायै नमः। ६. यं यमुनायै नमः। वामे–७. क्षं क्षेत्रपालाय नमः। ८. यं यमुनायै नमः। दक्षे–९. धां धात्रे नमः। वामे–१०. विं विधात्रे नमः। दक्षे–११. शं शङ्खनिधये नमः। वामे–१२. पं पद्मनिधये नमः। इति सम्पूज्य, चतुर्द्वारेषु दक्षवामपार्श्वक्रमेण यजेत्।

१. नन्दिने नमः। २. महाकालाय नमः। ३. गणेशाय नमः। ४. वृषभाय नमः। ५. भृङ्गिरिट्यादिभ्यो नमः। ६. स्कन्दाय नमः। ७. पार्वतीशाय नमः। ८. चण्डीश्वराय नमः। इति द्वारदेवताः सम्पूज्य, आत्मानं शङ्करं ध्यायन् पठेत्—

अपक्रामन्तु ते भूता ये भूता भुवि संस्थिताः।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥१॥

वाँयें ३. 'सं सरस्वत्यै नमः' फिर दाहिने ४. 'विं विघ्नाय नमः' ५. 'गं गङ्गायै नमः' ६. 'यं यमुनायै नमः' फिर बाँयें ७. 'क्षं क्षेत्रपालाय नमः' ८. 'यं यमुनायै नमः,' फिर दाहिने ९. 'धां धात्रे नमः' फिर बाँयें १०. 'विं विधात्रे नमः' फिर दाहिने ११. शं शंखनिधये नमः' बाँयें १२. 'पं पद्मनिधये नमः' इन मन्त्रों से पूजा करे।

तदनन्तर यज्ञमण्डप के चारों द्वार पर प्रथम प्रवेश से दाहिने, और फिर बाँयें इस क्रम से देवताओं का अक्षत से 'नन्दिने नमः' से लेकर 'चण्डीश्वराय नमः' पर्यन्त आठ मन्त्रों का आवाहन कर पूजन करे, फिर इन आठ द्वार-देवताओं का पूजन कर, अपने को शंकर के रूप में ध्यान करता हुआ 'अपक्रामन्तु' से प्रारम्भ कर, 'ब्रह्मकर्म समारभे' तक मन्त्र का पाठ करे। जिसका अर्थ इस प्रकार है—

पृथ्वी पर रहने वाले जितने भूत हैं वे यहाँ से हट जायें, तथा जो

अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् ।
सर्वेषामविरोधेन ब्रह्मकर्म समारभे ॥२॥

इति पठन् तिग्मदृष्ट्या दिव्यानर्घ्योदकैरन्तरिक्षगान् वामपार्ष्णिघातत्रयेण भौमान् विघ्नानुत्सार्य, तस्मान्निर्गच्छतां विघ्नानामवकाशप्रदानाय वामाङ्गं सङ्कोचयन् दक्षिणपादपुरःसरं मण्डपं प्रविश्य, तस्य नैर्ऋत्यकोणे—(१) 'क्षं क्षेत्रपालाय नमः, (२) विं विधात्रे नमः ।' इति सम्पूज्य, भैरवाज्ञां प्रार्थयेत्—

तीक्ष्णदंष्ट्र ! महाकाय ! कल्पान्तदहनोपम ! ।
भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥३॥

विघ्नकर्त्ता भूत हैं वे भी शिव की आज्ञा से हट जायें ॥ १ ॥

समस्त भूत तथा पिशाच सभी दिशाओं से दूर हटें। मैं किसी का भी विरोध न कर, इस ब्रह्मयज्ञ का आरम्भ कर रहा हूँ॥ २ ॥

इस मन्त्र को पढ़ता हुआ तिग्मदृष्टि से देवलोक के तथा अर्घ्योदक से अन्तरिक्षलोक के बाँयें तरफ तीन बार करतल को बजाकर, भूमिलोक के समस्त विघ्नों को दूर करे। और वहाँ से निकलते हुए विघ्नों को मार्ग देने के लिए बाँयें भाग से कुछ सिकुड़ता हुआ दाहिने पैर को आगे बढ़ाकर मण्डप में प्रवेश करे, फिर मण्डप के नैर्ऋत्य कोण में— १. 'क्षं क्षेत्रपालाय नमः' २. 'विं विधात्रे नमः' इस प्रकार नैर्ऋत्य कोण में इन दो देवताओं की पूजा करे। पश्चात् निम्नलिखित भैरव की आज्ञा के लिए श्लोक पढ़कर प्रार्थना करे—

हे तीक्ष्ण दाँत वाले, कल्पान्त अग्नि के समान, महाकाय भैरव ! मैं आपको नमस्कार करता हूँ। मुझे आप आज्ञा प्रदान करें ॥३॥

इति प्रार्थ्य, 'कूर्मचक्र' विचिन्त्य, 'ॐ भूर्भुवः स्वः' इति जलेन भूमिं प्रोक्ष्य, गन्धेन स्वाग्रे त्रिकोणं विलिख्य, कोणेषु 'रं', दण्डेषु, 'आं ह्रीं क्रों', मध्ये 'ह्रीं' च विलिख्य, तत्र कुश-चर्माऽम्बरमुत्तरोत्तरं दोषवर्जितमासनमास्तीर्य, १. 'अनन्तासनाय नमः, २. विमलासनाय नमः, ३. पद्मासनाय नमः' इति मन्त्रैस्त्रीन् दर्भानासने निदध्यात् ।

इस प्रकार प्रार्थना कर, कूर्मचक्र का ध्यान कर, 'ॐ भूर्भुवः स्वः' मन्त्र को पढ़कर जल से पृथ्वी को सिंचन चरे। तथा गन्ध से अपने आगे त्रिकोण बनाकर, प्रत्येक कोण पर 'रं' तथा त्रिकोण की भुजाओं पर 'आं ह्रीं क्रों' तथा त्रिकोण के मध्य में 'ह्रीं' लिखकर, कुशा तदनन्तर मृगचर्म पश्चात् कम्बलादि से बने हुए आसन को, जो दग्ध, भग्न आदि दोषों से विवर्जित हो, बिछावे. १. 'अनन्तासनाय नमः' २. 'विमलासनाय नमः, ३. 'पद्मासनाय नमः' इन तीन मन्त्रों से तीन कुशा आसन पर रखे।

---

१. क्षेत्रमध्यं समाश्रित्य कूर्मचक्रं विचिन्तयेत् ।
कूर्मचक्रमविज्ञाय यः कुर्याज्जप-यज्ञकम् ॥
तज्जपस्य फलं नास्ति सर्वानर्थाय कल्पते । (यामले)
देशं ग्रामं गृहं वाऽपि नवधा विभजेन्नरः ॥
प्रागादि-पश्चिमान्तं तु कादि-मान्तानि विन्यसेत् ।
अक्षराण्यथ यादीनि तथाऽष्टौ कोष्ठयोर्न्यसेत् ॥
ईशद्वयमधो मध्ये स्वरान् प्रागादि विन्यसेत् ।
श-सान्तान्तु दिशः पश्चान्नामाक्षरतो भवेत् ॥
तन्मुखं पार्श्वयोः पाणी कुक्षी पादौ ततस्ततः॥
पुच्छमेकमथो मध्य पृष्ठमेवं षडङ्गवान् । (गौतमीये)
— पुरश्च०, षष्ठत०, पृ० ४७७

ततः 'ॐ ह्रीं आधारशक्तिकमलासनाय नमः' इत्यासनं सम्पूज्य, १. 'दीं दीपनाथाय नमः, २. 'दुं दुर्गायै नमः, ३. गं गणपतये नमः, ४. बं बटुकाय नमः, ५. क्षं क्षेत्रपालाय नमः, ६. ल पृथिव्यै नमः' इति सम्पूज्य, पृथिवीं प्रार्थयेत्–

पृथ्वि ! त्वया धृता लोका देवि ! त्वं विष्णुना धृता ।

तदनन्तर 'ॐ ह्रीं आधारशक्तिकमलासनाय नमः' इस मन्त्र से आसन की पूजा करे, १. 'दीं दीपनाथाय नमः' २. 'दुं दुगायै नमः' ३ 'गं गणपतये नमः' ४ 'बं बटुकाय नमः' ५. 'क्षं क्षेत्रपालाय नमः' ६. 'लं पृथिव्यै नमः' इस मन्त्र से पृथ्वी की पूजा कर 'पृथ्वि त्वया–' से 'सुरेश्वरि' तक श्लोक पढ़कर प्रार्थना करे।

हे पृथ्वि, तुम समस्त लोकों को धारण करने वाली हो, हे देवि !

---

१. दुर्गा दैत्ये महाविघ्न भवबन्धे कुकर्मणि ।
शोके दुःखे च नरके यमदण्डे च जन्मनि ।।१।।
महाभये च रोगे चाऽप्याशब्दो हन्तृ-वाचकः ।
एतान् हन्त्येव या देवी सा दुर्गा प्रकीर्तितः ।।२।।
अपि च–
दैत्यनाशार्थवचनो दकारः परिकीर्तितः ।
उकारो विघ्ननाशस्य वाचको वेदसम्मतः ।।१।।
रेफो रोगघ्न-वचनो गश्च पापघ्न-वाचकः ।
भय-शत्रुघ्न-वचनश्चाकारः परिकीर्तितः ।।२।।
स्मृत्युक्तिश्च श्रवणाद्यस्याऽन्ते नश्यन्ति निश्चितम् ।
ततो दुर्गा हरेः शक्तिर्हरिणा परिकीर्तिता ।।३।।
दुर्गेति दैत्यशमनोऽप्याकारो नाशवाचकः ।
दुर्गं नाशयति या नित्यं सा दुर्गा प्रकीर्तिता ।।४।।
विपत्तिवाचको दुर्गश्चाकारो नाशवाचकः ।
त ननाश पुरा तेन बुधैर्दुर्गा प्रकीर्तिता ।।५।।

त्वं च धारय मां नित्यं पवित्रं कुरु चासनम् ॥४॥
नित्यं पूताऽसि देवि ! त्वं वराहेण समुद्धृता ।
मां च पूतं कुरु धरे ! नतोऽस्मि त्वां सुरेश्वरि ! ॥५॥

इति प्रार्थ्य, स्वस्तिकाद्यासनेन प्राङ्मुख उदङ्मुखो वा निश्चलं समुपविश्याऽऽचम्य, प्रणवेन (१६।६४।३२) पूरक-कुम्भक-रेचकैः प्राणायामत्रयं कृत्वा, 'संघट्टनीं मुद्रां बध्वा, ब्रह्मरन्ध्रे श्रीगुरुं नमेत् ।

ततः 'ॐ ऐं ह्रीं श्रीं रक्तद्वादशशक्तियुक्ताय दीपनाथाय नमः' इति दीपं भुवि संस्थाप्य, 'ॐ रां रीं रूं रैं रौं रः' इति स्वपरितोऽग्निप्राकारत्रयं विचिन्त्य, 'ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः फट्'

तुम्हें भगवान् विष्णु ने धारण किया है। अतः हे देवि ! तुम मुझे धारण करो और मेरे आसन को पवित्र करो ॥४॥ हे भगवति, भगवान् वराह ने तुम्हें पाताल से ले आकर तुम्हारा उद्धार किया है। हे देवि ! तुम नित्य पवित्र हो, हे सुरेश्वरि, मैं तुम्हें नमस्कार करता हूँ। तुम मुझे पवित्र करो ॥५॥

इस प्रकार पृथ्वी की प्रार्थना कर, 'स्वस्तिकाधार आसन से स्थिर होकर, पूर्व मुख या उत्तर मुख आसन पर बैठे, तदनन्तर आचमन कर सोलह प्रणव पढ़ता हुआ पूरक, चौंसठ प्रणव से कुम्भक तथा बत्तीस प्रणव पढ़ता हुआ रेचक के क्रम से तीन बार प्राणायाम करे। फिर संघट्टनी मुद्रा बनाकर ब्रह्मरन्ध्र में श्रीगुरु को नमस्कार करे।

तदनन्तर 'ॐ ऐं ह्रीं श्रीं रक्तद्वादशशक्तियुक्ताय दीपनाथाय नमः' इस मन्त्र को पढ़कर, पृथ्वी पर दीप रखे, 'ॐ रां रीं रूं रैं रौं रः' इस मन्त्र से अपने चारों ओर तीन अग्नि के प्राकार (चहार-दीवारी) का ध्यान करे। फिर 'ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः फट्' इस मन्त्र से

इति दशदिग्बन्धनं कृत्वा, 'ॐ ऐं ह्रीं श्रीं त्रैलोक्यं रक्ष हुं फट् स्वाहा' इति पुनश्छोटिकया दिग्बन्धनं कुर्यात् । इति ।

भूतशुद्धिः

अथ स्वदक्षिणे पञ्चपात्रं गन्धा-ऽक्षत-पुष्पादीन् । वामभागे जलपूर्णपात्रं व्यजन-छत्र-दर्पण-चामरादीनि च संस्थाप्य भूतशुद्धिं कुर्यात् ।

'ॐ शरीरस्य आत्मा ऋषिः, प्रकृतिपुरुषौ छन्दसी, सत्यं देवता, कर्मानुष्ठानसिद्धये विनियोगः' इति पठित्वा, कुण्डलीं ध्यायेत् ।

मूलाधारस्थितां देवीं कुण्डलीं परदेवताम् ।
विसतन्तुनिभां विद्युत्प्रभां ध्यायेत् समाहितः ॥१॥

दसों दिशाओं में अपनी रक्षा करता हुआ 'ॐ ऐं ह्रीं श्रीं त्रैलोक्यं रक्ष हुं फट् स्वाहा' इस मन्त्र को पढ़कर जल के छींटे से दसों दिशाओं में अपनी रक्षा करे ।

भूतशुद्धि—तदनन्तर अपने दाहिने पंचपात्र, गन्ध, अक्षत तथा पुष्प, बायीं ओर जल से भरा हुआ पूर्णपात्र, व्यजन, छाता, दर्पण तथा चँवर आदि को स्थापित कर, नीचे लिखे मन्त्र से भूतशुद्धि करे ।

विनियोग—शरीर के आत्मा ऋषि हैं, प्रकृति पुरुष छन्द हैं, सत्य देवता हैं, कर्मानुष्ठान से सिद्धि की प्राप्ति के लिए विनियोग है ।

ध्यान—मूलाधार में रहने वाली विसतन्तु के समान स्वच्छ वर्ण वाली, बिजली के समान प्रभावाली, परदेवता स्वरूप कुण्डलिनी देवी का मैं ध्यान करता हूँ ॥ १ ॥

'यं' इति तां मूलाधारादुत्थाय, सुषुम्णामार्गेण हृदयाम्बुजं गच्छन्तीं प्रदीपकलिकाकारां जीवसंयुतां कुण्डलीं ब्रह्मरन्ध्रगतां हंसमन्त्रेण ब्रह्मणि संयोज्य, पादादि-ब्रह्मरन्ध्रान्तस्थित-भूतानि स्मरेत्, १. पादादि-जानुपर्यन्तं चतुष्कोणं वज्रलाञ्छितं 'लं' बीजाढ्यं स्वर्णवर्णं पद्म-मन-घ्राण-गन्ध-ब्रह्म-निर्वृति-समान-संयुतमवनिमण्डलं ध्यात्वा, जान्वादि-नाभिपर्यन्तम्, २. चन्द्रार्द्धनिभमम्बुजद्वयाङ्कितं 'वं' बीजयुतं श्वेताभं पाणिग्रहण-रसनारसविष्णुप्रतिष्ठोदानसंयुतमुदकमण्डलं ध्यात्वा, ३. नाभ्यादि-हृदयान्तं त्रिकोणं स्वस्तिकाङ्कितं 'रं' बीजाढ्यं रक्तं पायु-विसर्ग-चक्षु-रूप-शिव-विद्या-व्यानसंयुतमनलमण्डलं ध्यात्वा, ४. हृदयादि-भ्रूमध्यपर्यन्तं षड्बिन्दुलाञ्छितं 'यं' बीजयुतं

'यं' इस मन्त्र के द्वारा कुण्डलिनी को मूलाधार से उठावे, फिर सुषुम्ना मार्ग से हृत्कमल तक दीपकलिका के समान जाती हुई, तदनन्तर जीव के साथ ब्रह्मरन्ध्र तक ब्रह्म से 'हंसः सोऽहं' इस मन्त्र से एकाकार संयुक्त होने की भावना रखे। और पैर से लेकर ब्रह्मरन्ध्र तक स्थित समस्त कुण्डलिनी के आकार को तत्तद्भूत—पृथिव्यादि के रूप में स्मरण करे। पैर से लेकर जानुपर्यन्त चारों कोने पर, वज्र के समान दृढ़, 'लं' बीज से युक्त स्वर्ण वर्ण, पद्म, मन, घ्राण, गन्ध, ब्रह्मनिर्वृति तथा समान से युक्त पृथ्वीमण्डल स्वरूप का ध्यान करे। तदनन्तर जानु से लेकर नाभिपर्यन्त अर्द्धचन्द्राकार दो कमल से युक्त 'वं' बीज युक्त, श्वेत प्रकाश वाली हाथ रसना रस विष्णु प्रतिष्ठा तथा उदान से संयुक्त उदक मण्डलाकार ध्यान करे। नाभि से लेकर हृदय तक त्रिकोण स्वस्तिक युक्त 'रं' बीज युक्त रक्त वायुविसर्ग नेत्र रूप शिव विद्या व्यान संयुक्त अनलमण्डलाकार ध्यान करे। हृदय से लेकर भ्रूमध्य तक छह बिन्दु से युक्त, 'यं' बीज युक्त, धूम्र वर्ण के

धूम्राभमुपस्थानं सत्वक्स्पर्शेशान-शान्त्यपान-संयुतमनिलमण्डलं ध्यात्वा, ५. भ्रूमध्यादि-ब्रह्मरन्ध्रान्तं वृत्तं स्वच्छं मनोहरं वाग्-वचन-श्रोत्र-शब्द-सदाशिव-शान्त्यतीत-प्राणसंयुतमाकाश-मण्डलं ध्यात्वा—इति सञ्चिन्त्य, [1]योनिं बध्वा, हंसमन्त्रं जपन्, केवलकुम्भकयोगेन भूतानि प्रविलापयेत् । यथा-भुवं जले, जल-मग्नौ, वह्निं वायौ, वायुमाकाशे, खमहङ्कारे, अहङ्कारं महत्तत्त्वे, महत्तत्त्वं प्रकृतौ, मायामात्मनि प्रविलापयेत् । ततः शुद्धसंविन्मयः पापपुरुषं ध्यायेत् ।

समान उठते हुए त्वक् स्पर्श ईशान शान्ति अपान से संयुक्त अनिल मण्डलाकार ध्यान करे। भ्रूमध्य से लेकर ब्रह्मरन्ध्र पर्यन्त गोल, स्वच्छ, मनोहर, वाग्, वचन, श्रोत्र, शब्द, सदाशिव शान्ति से परे प्राण संयुक्त आकाश मण्डलाकार ध्यान करे। इस प्रकार तत्तत् स्थानों में कुण्डलिनी का ध्यान करता हुआ, योनिमुद्रा बनाकर, हंस मन्त्र का जप करता हुआ, केवल कुम्भक प्राणायाम से समस्त भूतों (पृथिव्यादि पंचतत्त्वों) को आत्मतत्त्व में लीन करे । उसका क्रम इस प्रकार है—पृथ्वी को जल में, जल को अग्नि में, अग्नि को वायु में, वायु को आकाश में, आकाश को अहंकार में, अहंकार को महत्तत्त्व में, महत्तत्त्व को प्रकृति में, प्रकृति को माया में तथा माया को आत्मतत्त्व में विलीन करे। पश्चात् शुद्ध संविन्मय पाप पुरुष का ध्यान करे, जिसका स्वरूप इस प्रकार है।

---

१. मिश्रः कनिष्ठिके बद्ध्वा तर्जनीभ्यामनामिके ।
अनामिकोर्ध्व-संश्लिष्टे दीर्घमध्यमयोरथ ।।
अङ्गुष्ठाग्रद्वयं न्यसेद् योनिमुद्रेयमीरिता ।।
—मन्त्र० महा०, पू० खं०, द्वि० त०

वामकुक्षिस्थितं कृष्णमङ्गुष्ठपरिमाणकम् ।
ब्रह्महत्याशिरोयुक्तं स्वर्णस्तेयभुजद्वयम् ॥१॥
मदिरापानहृदयं गुरुतल्पकटिद्वयम् ।
पापिसंयोगपद् – द्वन्द्वमुपपातक-रोमकम् ।
खड्गचर्मधरं दुष्टमधोवक्त्रं च दुःसहम् ॥२॥

इति ध्यात्वा, 'यं' इति वायुबीजं षोडशधा जपन्, वायुमापूर्य, पापपुरुषेण सह देहं संशोध्य, 'रं' इति वह्निबीजं चतुःषष्ठिवारं जपन्, कुम्भकेन पापपुरुषेण सह देहं दग्ध्वा, 'यं' इति बीजं द्वात्रिंशद्वारं जपन्, रेचकं कुर्वन्, वामनासापुटेन भस्म उत्सार्य, पुनर्वामनासापुटेन 'वं' इति सुधाबीजं द्वात्रिंशद्वारं जपन्, वायुमापूर्य, तद्भस्म संप्लाव्य,

---

जो कुक्षि के वामभाग में निवास करता है, शरीर से जो कृष्णवर्ण अंगुष्ठ मात्र परिमाण वाला है। ब्रह्महत्या जिसके सिर पर है, सुवर्ण, स्तेय दोनों भुजाओं में रहते हैं ॥१॥ जिसका हृदय मदिरापान से पूर्ण है, जिसकी दोनों कटि गुरुतल्प से युक्त है। जिसके दोनों पैर पापियों से संयुक्त हैं, जिसके रोम में उपपातक का निवास है, जिसने खड्ग तथा ढाल धारण किया है, जिसका मुख नीचे की ओर है तथा जो अत्यन्त दुःसह है ॥२॥

इस प्रकार जप करता हुआ, 'यं' इस वायु बीज का सोलह बार जप करे। पुनः शरीर में वायु भरकर पापपुरुष के साथ शरीर को सुखाकर, 'रं' इस अग्नि के बीज को चौंसठ बार जप करता हुआ, कुम्भक प्राणायाम से पापपुरुष के साथ शरीर को जला हुआ समझ कर, 'यं' इस बीज मन्त्र का बत्तीस बार जप करते हुए रेचक करे। तदनन्तर बाँयी नासिका से शरीर के भस्म को निकाल कर, फिर बाँयी नासिका से 'वं' सुधा बीज को बत्तीस बार जप कर, शरीर में

'लं' इति भूबीजं चतुःषष्ठिवारं जपन् कुम्भकेनाऽऽप्लावितं भस्म घनीकृत्य, 'हं' इति विशुद्ध-मुकुराकारमाकाशबीजं षोडशधा जपन्, रेचकेन मूर्द्धादि-पादपर्यन्तान्यङ्गानि रचयेत्।

इति प्राणायामः।

[१]**भूतशुद्धिः**

अथ भूतान्युत्पादयेत्। परमात्मनः प्रकृतिं तस्माद् महत्तत्त्वं तस्मादहङ्कारं तस्मादाकाशमाकाशाद् वायुं वायोरग्निमग्नेराप अद्भ्यः पृथिवीमुत्पाद्य, स्व-स्वस्थाने स्थापयित्वा, 'सोऽहं' इति परमेणात्मनाविरजं परसङ्गसुधामयं जीवं हृदयाम्बुज-

---

वायु भरे। और भस्म को सुधा से संयुक्त कर, 'लं' इस पृथ्वी बीज का चौंसठ बार जप कर, कुम्भक के द्वारा आप्लावित भस्म को घना कर, 'हं' इस विशुद्ध दर्पण के समान आकाश बीज को सोलह बार जप करता हुआ, रेचक प्राणायाम से शुद्ध सिर से लेकर पैर तक सभी अंगों का निर्माण करे। यह प्राणायाम की विधि है।

तदनन्तर अंग निर्माण के लिए पृथिव्यादि पंचतत्त्वों को उत्पन्न करने की भावना इस प्रकार करे। परमात्मा से प्रकृति, प्रकृति से महत्तत्त्व, महत्तत्त्व से अहंकार, अहंकार से आकाश, आकाश से वायु, वायु से अग्नि, अग्नि से जल, जल से पृथिवी को उत्पन्न कर, तत्तद् स्थानों में स्थापित कर, 'सोऽहं' इस मन्त्र रजोगुण रहित परसंग सुधामय जीव को हृदयाकाश में ले आकर स्थापित

---

१. सर्वासु वाह्यपूजासु अन्तःपूजा विधीयते।
अन्तःपूजा महेशानि! बाह्यकोटि फलं लभेत्॥१॥
भूतशुद्धि-लिपिन्यासौ विना यस्तु प्रपूजयेत्।
विपरीतफलं दद्यादभक्त्या पूजने यथा॥२॥ इति।

मानीय, संस्थाप्य, हृदम्भोजात्कुण्डलिनीं मूलाधारे संस्थाप्य, स्वशरीरं निरस्तसकलकलुषं पुण्यात्मकं देवाराधनयोग्यं च भावयेत् । इति भूतशुद्धिः ।

प्राणप्रतिष्ठा

विनियोगः—ॐ अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्म-विष्णु-रुद्रा ऋषयः, ऋग्-यजुः-सामानि छन्दांसि, प्राणशक्तिर्देवता, आं बीजम्, ह्रीं शक्तिः, क्रों कीलकम्, प्राणस्थापने विनियोगः ।

करन्यासः—ऋष्यादिकं विन्यस्य, १. अं कं खं गं घं ङं आं आकाश-वाय्वग्नि-सलिल-भूम्यात्मने अङ्गुष्ठाभ्यां नमः, २. इं चं छं जं झं ञं ईं शब्द-स्पर्श-रूप-रस-गन्धात्मने तर्जनीभ्यां स्वाहा, ३. उं टं ठं डं ढं णं ऊं श्रोत्र-त्वक्-चक्षु-जिह्वा-घ्राणात्मने मध्यमाभ्यां वषट्, ४. एं तं थं दं धं नं ऐं वाक्-पाणिपाद-पायूपस्थात्मने अनामिकाभ्यां हुम्, ५. ओं पं फं बं भं मं औं

करे। फिर हृदय-कमल पर निवास करने वाली कुण्डलिनी को मूलाधार में स्थापित कर, अपने शरीर को समस्त पापरहित पुण्य से युक्त तथा देवताराधन के योग्य हो गया है, ऐसी भावना करे।

प्राणप्रतिष्ठा—दाहिने हाथ में जल लेकर, 'ॐ अस्य श्रीप्राण-प्रतिष्ठापनमन्त्रस्य–' से लेकर, 'प्राणस्थापने विनियोगः' तक मन्त्र पढ़कर भूमि पर जल छोड़े ।

तत्पश्चात् क्रमशः ऋष्यादिन्यास कर, 'अं कं खं गं घं–' से दोनों अँगूठे, 'इं चं छं जं झं ञं–' से दोनों तर्जनी, 'उं टं ठं डं ढं णं–' से दोनों मध्यमा अंगुली, 'एं तं थं दं धं–' से दोनों अनामिका, 'ओं पं फं बं भं

वचनादागमन-विसर्गानन्दात्मने कनिष्ठिकाभ्यां वौषट् ६. अं यं रं लं वं शं षं सं हं लं क्षं अः मनो-बुद्धि-चित्ता-ऽहङ्कारात्मने करतलकरपृष्ठाभ्यां फट् ।

एवं हृदयादिषु विन्यस्य, नाभ्यादि-पादान्तं आं नमः नाभ्यादि-हृदयान्तं ह्रीं नमः । हृदयादि-शिरोऽन्तं क्रों नमः इति विन्यस्य । हृदये पूर्वादितः । १. यं त्वगात्मने नमः, २. रं असृगात्मने नमः, ३. लं मांसात्मने नमः, ४. वं मेदात्मने नमः, ५. शं अस्थ्यात्मने नमः, ६. षं मज्जात्मने नमः, ७. सं शुक्रात्मने नमः, ८. हं प्राणात्मने नमः, ९. लं जीवात्मने नमः, १०. क्षं सर्वात्मने नमः, इति विन्यस्य, मूलेन मूर्द्धादि-पादान्तं व्यापकं कृत्वा ध्यायेत् ।

रक्ताम्भोधिस्थ-पोतोल्लसदरुण-सरोजाधिरूढा कराब्जैः
पाशं कोदण्डमिक्षूद्भवमणिगुणमप्यङ्कुशं पञ्चबाणान् ।

मं–' से दोनों कनिष्ठिका, 'अं यं रं लं वं शं–' से दोनों हाथ की हथेलियों का स्पर्श करे।

इसी प्रकार हृदयादि न्यास कर, 'आं नमः' पढ़कर नाभि से पैर तक, 'ह्रीं नमः' पढ़कर नाभि से हृदय तक, 'क्रों नमः' से हृदय से सिर पर्यन्त स्पर्श करना चाहिए। इसी प्रकार 'ह्रीं नमः' से हृदय से, फिर 'यं त्वगात्मने नमः' से 'क्षं सर्वात्मने नमः' पर्यन्त दस मन्त्र पढ़कर, त्वक्, असृक्, मांस, मेदा, अस्थि, मज्जा, शुक्र, प्राण, जीवात्मा तथा सर्वात्मा को स्पर्श की भावना कर मूल मन्त्र से सिर से पैर तक व्यापक मुद्रा बनाकर प्राण शक्ति का ध्यान करे।

समुद्र में रहने वाली, रक्त वर्ण के पोत के समान खिली हुई, अरुण

बिभ्राणाऽसृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या
देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥१॥

इति ध्यात्वा, मानसोपचारैः सम्पूज्य, हृदये हस्तं निधाय, मन्त्रं जपेत् । ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों हंसः (१४) मम प्राणा इह प्राणाः । ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों हंसः (१४) मम जीव इह स्थितः । ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों हंसः (१४) मम सर्वेन्द्रियाणि वाङ्-मनश्चक्षुः-श्रोत्र-जिह्वा-घ्राण-प्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा (६३) इति त्रिः प्रजपेत् । इति प्राणप्रतिष्ठा ।

अन्तर्मातृकान्यासः

ॐ अस्य श्रीअन्तर्मातृकान्यासस्य प्रजापतिर्ऋषिः, गायत्रीच्छन्दः, अन्तर्मातृकासरस्वती देवता, हलो बीजानि, स्वराः शक्तयः, बिन्दवः कीलकानि, अखिलाप्तये विनियोगः ।

वर्ण के कमल पर बैठी हुई, अपने हस्त कमल में पाश, इक्षु, कोदण्ड, अणिमादि गुणों से युक्त, अंकुश, पंचबाण, असृक् पूर्ण कपाल को धारण करने वाली, तीन नेत्रों से युक्त, पीनस्तन वाली, बाल रवि के समान रक्त वर्ण वाली, परा नाम की प्राणशक्ति देवी हम लोगों का कल्याण करने वाली हों ॥१॥

इस प्रकार ध्यान कर, मानसोपचार से हृदय में पूजा कर, 'ह्सां' मन्त्र का जप करे। तदनन्तर 'ॐ आं ह्रीं क्रों–' से आरम्भ कर 'तिष्ठन्तु स्वाहा' पर्यन्त मन्त्र को तीन बार पढ़कर शरीर में प्राण-प्रतिष्ठा करे।

अन्तर्मातृकान्यास–हाथ में जल लेकर, 'ॐ अस्य–' से 'अखिलाप्तये विनियोगः' तक मन्त्र पढ़कर, भूमि पर जल छोड़ दे।

ऋष्यादिकं विन्यस्य, अं कं खं० ५. आं अङ्गुष्ठाभ्यां नमः। इं चं छं० ५ ईं तर्जनीभ्यां स्वाहा। उं टं ठं० ५ ऊं मध्यमाभ्यां वषट्। एं तं थं दं धं० ५ ऐं अनामिकाभ्यां हुम्। ओं पं फं० ५ औं कनिष्ठिकाभ्यां वौषट्। अं यं रं १० अः करतलकरपृष्ठाभ्यां फट्। एवं हृदयादिषु विन्यस्य, शिरसि वर्णाब्जं चिन्तयेत्।

व्योमेन्द्वो-रसनार्ण-कर्णिकमचां द्वन्द्वैः स्फुरत्केसरं
पत्रान्तर्गत-पञ्चवर्ग-य-श-लार्णादि-त्रिवर्गक्रमात्।
आशास्वस्त्रिषु लान्त-लाङ्गलियुजा क्षोणीपुरेणावृतं
वर्णाब्जं शिरसि स्थितं विषगदप्रध्वंसि मृत्युञ्जयम्॥१॥

इति विचिन्त्य, तन्मध्ये सरस्वतीं ध्यायेत्—

बन्धूकाभां त्रिनेत्रां पृथुतरविलसच्छक्तिमद्रक्तवस्त्रां
पीनोत्तुङ्ग-प्रवृद्ध-स्तन-जघनभरां यौवनारम्भरूढाम्।

पश्चात् ऋष्यादि न्यास कर, 'अं कं खं–' मन्त्र पढ़कर अँगूठे का, 'इं चं छं ५ ईं–' से दोनों तर्जनी, 'उं टं ठं ५ ऊं–' पढ़कर दोनों मध्यमा अंगुलि, 'एं तं थं दं –' से दोनों अनामिका, 'ओं पं फं ५ औं–' से कनिष्ठिका अंगुलि का स्पर्श करे तथा 'अं यं रं १० अः'– मन्त्र पढ़कर करतलकर पृष्ठ का स्पर्श करे। इसी प्रकार हृदयादि का भी न्यास करे। पश्चात् 'व्योमेन्द्वोरसनार्ण–' श्लोक पढ़कर शिरःस्थान में वर्णरूप कमल का ध्यान करे, जो इस प्रकार है—

तदनन्तर उस वर्ण कमल में सरस्वती का ध्यान करे, जिनके शरीर का वर्ण बन्धूक पुष्प के समान है, जिनके तीन नेत्र हैं, जिन्होंने रक्त-वर्ण का वस्त्र धारण किया है, जिनके स्तन पीन, उत्तुंग तथा प्रवृद्ध हैं, जो जघन के भार से विनम्र हैं, जिनकी युवावस्था प्रारम्भ

सर्वालङ्कारयुक्तां सरसिजनिलयामिन्दुवक्त्रान्तर्मूर्ति
हस्तैः [1]पाशा-ऽङ्कु[2]शाद्यामभ[3]य-वरकराम म्बिकां तां नमामि ॥२॥

इति ध्यात्वा, पञ्चोपचारैः सम्पूज्य, न्यसेत्। यथा-कण्ठस्थ-षोडशदलेषु षोडशस्वरान् 'ऐं ह्रीं श्रीं अं नमः' इत्यादि ३, 'अः नमः' इत्यन्तं विन्यस्य १, एवमनाहत-पद्मस्थ-द्वादश-दलेषु कादि-ठान्तान् २, मणिपूरस्थ-दशदलेषु डादि-फान्तान् ३,

होने वाली है, जो सभी अलंकारों से परिपूर्ण हैं, कमल में निवास करने वाली हैं, जिनका मुख चन्द्र के समान सुशोभित है, जिनके हाथों में पाश, अंकुश, अभय तथा वर मुद्रा सुशोभित हो रहे हैं, ऐसी अम्बिका को मैं नमस्कार करता हूँ ॥ १–२ ॥

साधक इस प्रकार से ध्यान कर, पंचोपचार से पूजन कर, न्यास करे। कण्ठस्थ—षोडश दल पद्म पर षोडश स्वरों—'ऐं ह्रीं श्रीं अं नमः' से आरम्भ कर 'अः नमः' इत्यन्त न्यास करे। इसी प्रकार अनाहत पद्म के बारह दलों पर 'ॐ कं नमः' से आरम्भ कर 'ॐ ठं नमः' तक, पुनः मणिपूरस्थ दस दलों के पद्म पर 'ॐ डं नमः' से

१. वाममुष्टिस्थ-तर्जन्यादक्षमुष्टिस्थ-तर्जनीम् ।
संयोज्याङ्गुष्ठकाग्राभ्यां तर्जन्यग्रे स्वके क्षिपेत् ॥
एषा वा पाशमुद्रेति विद्वद्भिः परिकीर्तिता ।
तथा च—
अङ्गुष्ठे तर्जनीं संयोज्य शेषाङ्गुलिप्रस्तरणेन पाशमुद्रा ।

२. ऋजुमध्या मध्यपर्वाक्रान्त तर्जन्यधोमुखी ।
विज्ञेयाऽङ्कुशमुद्रेयं कुञ्चितामध्यपर्वतः ।
अपि च—
दक्षमुष्टिगृहीतस्य वाममुष्टेस्तु मध्यमाम् ।
प्रसार्य तर्जन्याकुञ्चेत् सेयमङ्कुशमुद्रिका ॥

३. दक्षिणहस्तेन ऊर्ध्वाङ्गुलिना पताकाकरणादभयमुद्रा ।

स्वाधिष्ठानस्थ-षड्दलेषु वादि-लान्तान् ४, मूलाधारस्थ-चतुर्दलेषु वादि-सान्तान् ५, आज्ञाचक्र-द्विदले ह-क्षौ ६, न्यसेत् ।

इत्यन्तर्मातृकान्यासः ।

बहिर्मातृकान्यासः

तत्र ऋष्यादिषडङ्गान्तं पूर्ववत् कृत्वा (अत्र बहिर्मातृकासरस्वतीदेवतेति विशेषः) ध्यायेत् ।

पञ्चाशद्वर्णभेदैर्विहितवदनदोः पादयुक्कुक्षिवक्षो-
देहां भास्वत्कपर्दाकलित-शशिकलामिन्दुकुन्दावदाताम् ।
अक्ष-स्रक्-कुम्भचिन्ता-लिखितवरकरां त्रीक्षणां पद्मसंस्था-
मच्छाकल्पामतुच्छ-स्तन-जघनभरां भारतीं तां नमामि ॥१॥

आरम्भ कर, 'ॐ फं नमः' तक, फिर स्वाधिष्ठानस्थ षड्दल के पद्म पर 'ॐ वं नमः' से आरम्भ कर 'ॐ लं नमः' तक तथा मूलाधारस्थ चार दल के पद्म पर 'ॐ वं नमः' से आरम्भ कर 'ॐ सं नमः' तक तथा आज्ञाचक्रस्थ द्वि दल के पद्म पर, 'ॐ हं नमः' से आरम्भ कर 'ॐ क्षं नमः' तक न्यास करे। यहाँ तक अन्तर्मातृकान्यास है।

बहिर्मातृकान्यास—इसमें ऋष्यादिन्यास तथा षडंगन्यास पूर्ववत् कर, बहिर्मातृकान्यास में सरस्वती का ध्यान करे।

ध्यान—पचास वर्णों के भेद से जिसके शरीर का मुख, हाथ, पैर, कुक्षि तथा वक्षःस्थल बना हुआ है, तथा शशिकला से जिनके देदीप्यमान कपर्द का निर्माण हुआ है, तथा जो चन्द्रमा के समान स्वच्छ वर्ण वाली हैं तथा जिनके हाथों में अक्ष, स्रक्, कुम्भ तथा चिन्ता (पुस्तक) सुशोभित हो रहे हैं, जिनके तीन नेत्र हैं, जो स्वच्छ कमलासन पर विराजमान हैं, तथा जिनके स्तन एवं जघन विशाल हैं, ऐसी भारती (सरस्वती) को मैं नमस्कार करता हूँ ॥१॥

इति ध्यात्वा न्यसेत्। मध्यमाऽनामिकाभ्यां भाले अं नमः १। तर्जनी-मध्यमा-ऽनामिकाभिः मुखवृत्ते आं नमः २। मध्यमा-ऽनामिकाभ्यां दक्षवामनेत्रयोः इं नमः ३, ईं नमः ४। अङ्गुष्ठेन दक्षवामकर्णयोः उं नमः ५, ऊं नमः ६। कनिष्ठाऽङ्गुष्ठाभ्यां दक्षवामनासापुटयोः ऋं नमः ७, ॠं नमः ८। तर्जनी-मध्यमा-ऽनामिकाभिः दक्षवामगण्डयोः लृं नमः ९, लॄं नमः १०। मध्यमा-ऽनामिकाभ्यां ऊर्ध्वाधरोष्ठयोः एं नमः ११, ऐं नमः १२। अनामिकया ऊर्ध्वाधरदन्तपंक्त्योः ओं नमः १३, औं नमः १४। मध्यमया शिरसि अं नमः १५। मध्यमया मुखे अः नमः १६। सर्वाङ्गुलीभिः दक्ष-भुजमूल-कूर्पर-मणिबन्ध-करतलाङ्गुल्यग्रेषु कं नमः १, खं नमः २, गं नमः ३, घं नमः ४, ङं नमः ५। एवं सर्वाङ्गुलीभिः वामहस्ते चं नमः ६, छं नमः ७,

---

इस प्रकार सरस्वती का ध्यान कर, न्यास करे। दोनों हाथ की मध्यमा तथा अनामिका अँगुलि से 'अं नमः' कहकर मस्तक को, तर्जनी, मध्यमा तथा अनामिका अँगुलि से 'आं नमः' कहकर मुख को, मध्यमा तथा अनामिका अँगुली से 'इं नमः' तथा 'ईं नमः' कह कर दाहिने तथा बाँयें नेत्र का स्पर्श करे। अँगूठे से दोनों कान का 'उं नमः' एवं 'ऊं नमः' पढ़कर, कनिष्ठा तथा अँगूठे से दोनों नासापुट का 'ऋं नमः,' 'ॠं नमः' पढ़कर, तर्जनी, मध्यमा तथा अनामिका से दोनों गण्डस्थल का 'लृं नमः' 'लॄं नमः' पढ़कर, मध्यमा तथा अनामिका से दोनों ओष्ठ एवं अधर पुट का 'एं नमः' 'ऐं नमः' पढ़कर अनामिका से ऊपर की दन्तपंक्ति का, 'ओं नमः' तथा 'औं नमः' पढ़कर मध्यमा से सिर का 'अं नमः' पढ़कर, मध्यमा से मुख का 'अः नमः' पढ़कर, सभी अंगुलियों से दाहिने भुजा का मूल, कूर्पर, मणिबन्ध, करतल अंगुलियों के अग्रभाग का स्पर्श, 'कं नमः' से

जं नमः ८, झं नमः ९, ञं नमः १० । सर्वाङ्गुलीभिः दक्षोरु-मूल-जानु-जङ्घा-पादतलाङ्गुल्यग्रेषु टं नमः ११, ठं नमः १२, डं नमः १३, ढं नमः १४, णं नमः १५ । एवं सर्वाङ्गुलीभिः वामपादे तं नमः १६, थं नमः १७, दं नमः १८, धं नमः १९, नं नमः २० । सर्वाङ्गुलीभिः दक्षवामपार्श्वयोः पं नमः २१, फं नमः २२ । अनामिका-कनिष्ठिकाभ्यां पृष्ठे बं नमः २३ । सर्वाङ्गुलीभिः नाभौ भं नमः २४ । जठरे मं नमः २५ । हृदि यं त्वगात्मने नमः २६ । दक्षांसे रं असृगात्मने नमः २७ । ककुदि लं मांसात्मने नमः २८ । वामांसे च मेदात्मने नमः २९ । हृदादि-दक्षवामकरान्तयोः शं अस्थ्यात्मने नमः ३० । षं मज्जात्मने नमः ३१ । हृदादि-दक्षवामपादयोः सं शुक्रात्मने नमः ३२ । हं प्राणात्मने नमः ३३ । हृदादि-नाभ्यन्तं लं जीवात्मने नमः ३४ । हृदादिमुखान्तं क्षं परमात्मने नमः ३५ । समस्तमातृकामुच्चार्य व्यापकं कुर्यात् । इति ।

एवमन्तर्बहिश्चैव नित्यं यो मातृकां न्यसेत् ।
तस्य सिद्धिर्भवेद् देवि ! नाऽत्र कार्या विचारणा ॥

इति बहिर्मातृकान्यासः ।

*

लेकर 'क्षं परमात्मने नमः' तक मन्त्र पढ़कर करे । इसी प्रकार समस्त (अक्षर) मातृका का उच्चारण कर व्यापक मुद्रा प्रदर्शित करे ।

इस प्रकार हे देवि ! जो लोग मातृका से अन्तर्न्यास तथा बहिर्न्यास करते हैं उनको अवश्य ही सिद्धि होती है, इसमें विचार की कोई बात नहीं है । इस प्रकार बहिर्मातृका न्यास समाप्त ।

श्रीकण्ठमातृकान्यासः

विनियोग—अस्य श्रीकण्ठमातृकान्यासस्य दक्षिणामूर्तिर्ऋषिः, गायत्रीच्छन्दः, अर्धनारीश्वरः शिवो देवता, हलो बीजानि, स्वराः शक्तयः, बिन्दवः कीलकानि, अभीष्टसिद्धये विनियोगः ।

ऋष्यादिन्यासः—दक्षिणामूर्तिऋषये नमः शिरसि, गायत्रीच्छन्दसे नमो मुखे, अर्धनारीश्वरीशिवदेवतायै नमो हृदये, हल्बीजेभ्यो नमो गुह्ये, स्वरशक्तिभ्यो नमः पादयोः, बिन्दुकीलकेभ्यो नमो नाभौ, अभीष्टसिद्धये विनियोगः, अञ्जलौ। इति ऋष्यादिकं विन्यस्य ।

करन्यासः—ह्सां अं कं खं गं घं ङं आं अङ्गुष्ठाभ्यां नमः। ह्सीं इं चं छं जं झं ञं ईं तर्जनीभ्यां स्वाहा । ह्सूं उं टं ठं डं ढं

अब श्रीकण्ठमातृकान्यास लिखते हैं, जो इस प्रकार है—दाहिने हाथ में जल लेकर, 'अस्य श्रीकण्ठमातृकान्यासस्य' से आरम्भ कर, 'अभीष्टसिद्धये विनियोगः' तक विनियोगमन्त्र पढ़कर भूमि पर जल छोड़े ।

इसके पश्चात् ऋष्यादिन्यास करे । 'दक्षिणामूर्तिऋषये नमः शिरसि' से सिरस्पर्श करे। 'गायत्रीच्छन्दसे नमो मुखे' से मुख छुए । 'अर्धनारीश्वरीशिवदेवतायै नमो हृदये' पढ़कर हृदय का स्पर्श करे। 'हल्बीजेभ्यो नमो गुह्ये' से गुह्यांग का स्पर्श करे। 'स्वरशक्तिभ्यो नमः पादयोः' से दोनों पैरों का स्पर्श करे। 'बिन्दुकीलकेभ्यो नमो नाभौ' पढ़कर नाभि (ढोंढ़ी) का स्पर्श करे। 'अभीष्टसिद्धये विनियोगः' से अंजलि-स्पर्श करे। इस प्रकार ऋष्यादिन्यास करना चाहिए ।

तदनन्तर करन्यास करना चाहिए । 'ह्सां अं कं खं गं घं ङं

णं ऊं मध्यमाभ्यां वषट्। ह्सैं एं तं थं दं धं नं ऐं अनामिकाभ्यां हुम्। ह्सौं ओं पं फं बं भं मं औं कनिष्ठिकाभ्यां वौषट्। ह्सः अं यं रं लं वं शं षं सं हं क्षं अः करतलकरपृष्ठाभ्यां फट्। एवं हृदयादिषु विन्यस्य ध्यायेत्।

सिन्दूर-काञ्चनसमोभय-भागमर्ध-
नारीश्वरं गिरिसुता-स्मरभूष-चिह्नम्।
पाशा-ऽभया-ऽक्ष-वलयेष्टद-हस्तमीशं
स्मृत्वा न्यसेत् सकलवाञ्छितवस्तुसिद्ध्यै ॥१॥

इति ध्यात्वा, पञ्चोपचारैः सम्पूज्य, बहिर्मातृकास्थानेषु न्यसेत्।

ततः पञ्चामृताभ्यङ्गमङ्गस्योद्वर्तनं तथा ।
मधुपर्कं परिमलद्रव्याणि विविधानि च ॥
पादुकान्दोलनादर्शं व्यजनं छत्र-चामरे ।
वाद्यार्तिक्यं नृत्य-गीत-शय्यां राजोपचारकाः ॥
—संस्कारभास्करे ।

ध्वनयो गीतरूपेण शब्दो वाद्यप्रभेदतः ।
मन एवातपत्रं च कल्पितं ते मया शिव ! ॥२॥

सुषुम्णा ध्वजरूपेण प्राणाद्याश्चामरात्मना ।
अहङ्कारो गजत्वेन वेगः क्लृप्तो रथात्मना ॥३॥

इन्द्रियाण्यश्वरूपाणि शब्दादिरथनेमिना ।
नमः प्रग्रहरूपेण बुद्धिः सारथिरूपतः ।
सर्वमन्यत्तथा क्लृप्तं तवोपकरणात्मना ॥४॥

इति पठित्वा, पूर्वोक्त-ऋष्यादिन्यासपूर्वकं मूलमन्त्रं यथाशक्ति जप्त्वा, जपं समर्पयेत् ।

गुह्याऽतिगुह्यगोप्ता त्वं गृहाणाऽस्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देव ! त्वत्प्रसादान्महेश्वर ! ॥ १ ॥

इति सामान्यार्घोदकेन देवदक्षिणकरे जपं समर्प्य, दण्डवत् प्रणम्य, अर्धप्रदक्षिणां कुर्यात् । ततः कवच-सहस्रनाम-स्तोत्रादिभिः स्तुत्वा प्रार्थयेत् ।

मन्त्रहीनं क्रियाहीनं भक्तिहीनं तु यद्भवेत् ।
तत्सर्वं कृपया देव ! क्षमस्व परमेश्वर ! ॥ १ ॥

श्लोकों को पढ़कर पूर्वोक्त ऋष्यादि न्यास करे। यथाशक्ति मूल मन्त्र का जप कर, 'गुह्याऽतिगुह्य०' श्लोक पढ़कर सामान्यरूप से अर्घ्य देते हुए देवता के दाहिने हाथ में जप समर्पित करे। और साष्टांग प्रणाम कर हाथ से आधी प्रदक्षिणा करे। पश्चात् हनुमत्कवच, सहस्रनाम तथा स्तोत्र आदि का पाठ कर 'मन्त्रहीनं' से लेकर 'क्षमस्व परमेश्वर'

यन्मया क्रियते कर्म जाग्रत्-स्वप्न-सुषुप्तिषु ।
तत्सर्वं तावकी पूजा भूयाद् भूत्यै नमः शिव ! ॥ २ ॥
भूमौ स्खलितपादानां भूमिरेवाऽवलम्बनम् ।
त्वयि जाताऽपराधानां त्वमेव शरणं प्रभो ! ॥ ३ ॥
अपराधो भवत्येव सेवकस्य पदे पदे ।
कोऽपरः सहते लोके केवलं स्वामिनं विना ॥ ४ ॥
अपराध - सहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वर ! ॥ ५ ॥

इति प्रार्थ्य, चुलुके शङ्खोदकमादाय, 'ॐ इतः पूर्वं प्राण-बुद्धि-देह-धर्माधिकारतो जाग्रत्-स्वप्न-सुषुप्त्यवस्थासु मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा, मां मदीयं सकलं हनुमते ते समर्पये ॐ तत्सत्' इति मन्त्रेणाऽऽत्मानं समर्प्य, शङ्खमुद्धृत्य ।

साधु वाऽसाधु वा कर्म यद्यदाचरितं मया ।
तत्सर्वं क्षम्यतां देव ! गृहाणाऽऽराधनं मम ॥ १ ॥

इति मन्त्रेण देवोपरि तं त्रिः परिभ्राम्य, किञ्चिज्जलं देव-दक्षिणकरे समर्प्य, अवशिष्टजलेनाऽऽत्मानं प्रोक्ष्य, शङ्खं यथा-

---

तक पाँच श्लोकों को पढ़ता हुआ प्रार्थना करे।

तदनन्तर अंजलि में शंख के जल को लेकर 'ॐ इतः पूर्वं' से 'ॐ तत्सत्' तक मन्त्र पढ़कर आत्मसमर्पण करे। फिर शंख को ऊपर उठा कर 'साधु वाऽसाधु' से 'मम' तक श्लोक पढ़कर मूर्ति पर शंख को तीन बार घुमावे तथा शंखस्थित कुछ जल, देवता के दाहिने हाथ में समर्पण कर, बचे हुए जल से अपने को अभिषिंचित करे।

स्थाने निधाय, तं गन्धा-ऽक्षत-पुष्पैः सम्पूज्य, पुष्पाञ्जलिमादाय।

रश्मिरूपा महादेवा अत्र पूजितदेवताः ।
हनुमदङ्गलीनास्ताः सन्तु सर्वाः सुखावहाः ।। १ ।।

इति समर्प्य, आवरणदेवताः प्रधानदेवाङ्गे लीना विभाव्य, 'क्षमस्व' इति वदन् तालत्रयेण देवं प्रबोध्य, तं तेजोमयं ध्यायन् ।

गच्छ गच्छ परं स्थानं स्वस्थानं परमेश्वर ! ।
यत्र ब्रह्मादयो देवा न विदुः परमं पदम् ।। १ ।।

इति [1]संहारमुद्रया तं निर्माल्य-पुष्पद्वारा समुद्धृत्याऽऽघ्राय, पूरकेन सहस्रदलकमलं प्रापय्य, तत्र क्षणं तेजोमयं ध्यात्वा, सुषुम्णया हृदयारविन्दमानीय पूर्ववद्ध्यात्वा, मानसोपचारैः सम्पूज्य, षडङ्गेन सङ्कलीकृत्य, मूलं दशधा प्रजप्य, क्षणं विश्राम्य,

शंख को यथा स्थान रखकर, उसे गन्ध, अक्षत, पुष्प से पूजन कर, पुष्पांजलि लेकर 'रश्मिरूपा महादेवा०' श्लोक पढ़कर पुष्प समर्पित करे और आवरण देवताओं को हनुमान् जी के अंग में लीन होने की भावना करे। 'क्षमस्व' ऐसा पढ़कर तीन बार ताली बजा कर, हनुमान् जी को जगा कर, उनके तेजोमय शरीर का ध्यान करे।

पश्चात् 'गच्छ गच्छ परं स्थानं' श्लोक उच्चारण कर संहारमुद्रा से निर्माल्य-पुष्पद्वारा उस मूर्ति को उठाकर, सूँघ कर, पूरक प्राणायाम के द्वारा हृदयस्थ सहस्रदल कमल पर उन्हें रखकर, उनके तेजोमय स्वरूप का ध्यान करे, और सुषुम्णा नाड़ी के द्वारा हृदयारबिन्द पर उस तेज को बिठा कर पूर्ववत् ध्यान करे। पुनः मानसोपचार से पूजन तथा षडंग न्यास करे। फिर मूल मन्त्र का दश बार जप कर,

१. संहारमुद्रा—प्राह्यस्योपरि हस्तं प्रसार्य, कनिष्ठिकादि-तर्जन्यन्तानामङ्गुलीनां क्रमसङ्कोचनेनाऽङ्गुष्ठमूलानयनात् संहारमुद्रा ।

पुनः कुण्डलीरूपेणाऽऽधारादि-ब्रह्मरन्ध्रान्तव्याप्तं ध्यायन्नाधारे स्थापयेत् ।

ततः शान्तिपाठं कृत्वा, श्रीगुरुं प्रार्थ्य, ताम्रपात्रे गन्धपुष्पोदकमादाय, 'ह्लीं ह्लीं हंसः श्रीसूर्याय एषोऽर्घ्यः स्वाहा ।' इति सूर्यायाऽर्घ्यं दत्वा प्रार्थयेत् ।

यज्ञच्छिद्रं तपच्छिद्रं यच्छिद्रं पूजने मम ।
तत्सर्वमच्छिद्रमस्तु भास्करस्य प्रसादतः ॥ १ ॥

इति प्रार्थ्य, मूलेन प्राणानायम्य, ऋष्यादिकं विन्यस्य, निर्माल्यपुष्पं शिरसि धृत्वा, चरणोदकं स्वीकृत्य, स्वात्मानं श्रीहनुमत्स्वरूपं ध्यायन्, यथासुखं विहरेत् ।

ब्रह्मयज्ञम्—अथ ब्रह्मयज्ञं योगक्षेमं कुर्यात् । ततो मध्याह्ने स्नात्वा, सन्ध्या-तर्पणपुरःसरं प्राग्वत्पूजां वैश्वदेवं च कृत्वा,

---

क्षणभर उन्हें विश्राम कराये, फिर कुण्डली रूप से आधारादि ब्रह्मरन्ध्र तक उन्हें व्याप्त समझ कर नाभि स्थित आधार पर्यन्त स्थान पर उन्हें स्थापित करे ।

तदनन्तर शान्तिपाठ कर, श्री गुरु की प्रार्थना करे । ताम्र पात्र में गन्ध एवं पुष्पोदक लेकर, 'ह्लीं ह्लीं हंसः०' इसको पढ़कर सूर्य को अर्घ्य प्रदान करे । तथा 'यज्ञच्छिद्रं तपच्छिद्रं' श्लोक पढ़कर प्रार्थना करे । तथा मूल मन्त्र को पढ़कर प्राणायाम करे और ऋष्यादि न्यास करे । निर्माल्य पुष्प को अपने शिर पर धारण करे । पश्चात् हनुमान् जी के चरणोदक को लेकर अपने को श्रीहनुमान् जी जैसा भावना करे । तदनन्तर यथासुख निवास करे ।

ब्रह्मयज्ञ—तदनन्तर अपने योगक्षेम कारक ब्रह्मयज्ञ करे । पश्चात् मध्याह्न में स्नान कर, सन्ध्या, तर्पण कर, पुनः पूजा तथा वैश्वदेव

ब्राह्मणैः सह श्रीहनुमत्प्रसादं स्वीकृत्य, आचम्य, यथोक्त-गण्डूषादिना मुखशुद्धिं विधाय, देवं स्मरन् पुराणं शृणुयात् ।

ततः सायङ्काले सन्ध्योपासनादि-देवपूजनान्तं कर्मा-ऽग्नि-होत्रं च कृत्वा, शुद्धशय्यायां देवं स्मरन् शयनं कुर्यात् ।

एवं यः पूजयेद् देवं त्रिकालं धर्ममाचरन् ।
न पीड्यतेऽरिदुःखोघैः स नरो हररक्षितः ।। १ ।।
त्रिकालपूजनाशक्तः कुर्याद् द्विः सकृदप्यथ ।
विशेषेण यजेद् देवं संक्रान्त्यादिषु पर्वसु ।। २ ।।
दशभिः पञ्चभिर्वाऽपि पूजयेदुपचारकैः ।
पूजां कर्तुमशक्तश्चेद् दद्यादर्चनसाधनम् ।। ३ ।।

करके ब्राह्मणों के साथ श्रीहनुमत्प्रसाद को ग्रहण करे, और आचमन करे तथा शास्त्रीय रीति के अनुसार कुल्ला कर मुख शुद्धि करे। फिर हनुमान् जी का स्मरण करता हुआ पुराण श्रवण करे ।

तदनन्तर सायंकाल में सन्ध्योपासन से लेकर देव पूजन एवं अग्निहोत्र कर्म करे। और शुद्ध शय्या पर हनुमान्जी का स्मरण करता हुआ शयन करे।

श्लोकार्थ—इस प्रकार धर्म का आचरण करता हुआ जो व्यक्ति त्रिकाल (प्रातः, मध्याह्न, सायं) हनुमान् जी का पूजन करता है उसे शत्रुजन्य पीड़ा कदापि नहीं होती। वह सदैव शंकर से परिरक्षित रहता है ।।१।। त्रिकाल पूजन में असमर्थ जो व्यक्ति दो काल अथवा एक काल की संक्रान्ति अथवा पर्व (अमावास्या, पौर्णमासी) के दिन विशेष रूप से दशोपचार तथा पंचोपचार से देवता का पूजन करता है अथवा पूजन करने में असमर्थ व्यक्ति केवल पूजा की सामग्री भी प्रदान करता है, अथवा पूजा करने में वा पूजा की सामग्री प्रदान करने में असमर्थ जो व्यक्ति

दानाशक्तः समर्चन्तं पश्येत् तत्परमानसः ।
पूजायाः साधनाभावे कुर्याच्छुद्धाम्भसा व्रती ॥ ४ ॥
सूतकी वा तु रोगी वा न स्नायान्न च पूजयेत् ।
विलोक्य मूर्ति देवस्य यदि वा सूर्यमण्डलम् ॥ ५ ॥
सकृन्मूलमनुं जप्त्वा तत्र पुष्पं विनिक्षिपेत् ।
ततस्तस्मिन् गते स्नात्वा पूजयित्वा गुरुं द्विजान् ॥ ६ ॥
पूजाविच्छेददोषो मे माऽस्त्विति प्रार्थयेत्ततः ।
तेभ्यश्चाऽऽशिषमादाय देवेशं पूजयेद् यजेत् ॥ ७ ॥
स्वयं सम्पाद्य सर्वाणि श्रद्धया साधनानि यः ।
पूजयेत् तत्परो देवं स लभेदखिलं फलम् ॥ ८ ॥
पूजने तु फलार्धः स्यादन्यदत्तैस्तु साधनैः ।
तस्मात् स्वयं समानीय साधनान्यर्चनं चरेत् ॥ ९ ॥

एकचित्त हो केवल पूजा को देखता है, पूजा-सामग्री के अभाव में जो व्यक्ति शुद्ध चित्त से व्रत कर केवल जल से अर्घ्य देता है ॥२-४॥ यदि सूतकी अथवा रोगी होने के कारण व्रती यदि स्नान एवं पूजन न कर सके तो देवविग्रह अथवा सूर्यमण्डल का दर्शन सूतक की निवृत्ति अथवा आरोग्य होने पर स्नान कर पुष्पार्पण द्वारा कहे कि हे भगवन् ! मेरे पूजा के विच्छेद का दोष मुझे न लगे। फिर गुरु की पूजा कर उनका आशीर्वाद लेकर पुनः देवेश का यजन एवं पूजन करे ॥५-७॥ पूजा की सामग्री स्वयं श्रद्धापूर्वक इकट्ठा करे एवं तन्मनस्क हो कर देवादिदेव का पूजन करे तो उसे समस्त फल की प्राप्ति हो जाती है ॥ ८ ॥

साधक यदि दूसरे के द्वारा सम्पादित साधन से पूजा करता है, तो उसे पूजा का आधा फल प्राप्त होता है, इसलिए सम्पूर्ण फल की

देवपूजाविहीनो यः स नरो नरकं पचेत् ।
तस्माच्छक्त्या तु देवार्चा विधेया श्रद्धयान्वितैः ॥१०॥
वेदेषु-नन्द-चन्द्राब्दे माघे भौमदिने सिते ।
दशम्यां सज्जयपुरे कपीशार्चनपद्धतिः ॥११॥
गौडविप्रान्वयोत्पन्न-रामचन्द्रतनूभुवा ।
नाथूनारायणेनेयं निर्मिता प्रीतये सताम् ॥१२॥
आचन्द्रभास्करं सैषा विराजतु महीतले ।
दयया कपिराजस्य लोकप्राणस्वरूपिणः ॥१३॥

इति पण्डितश्रीसन्तशरणमिश्रात्मज-श्रीशिवदत्तमिश्रशास्त्रिरचिते हनुमद्-रहस्ये श्रीगौडवंशवर्य-चतुर्वेदिरामचन्द्रात्मज-नाथूनारायण-शर्मणा विरचिता श्रीहनुमत्पूजापद्धतिः सम्पूर्णा ।

प्राप्ति के हेतु स्वयं पूजा सामग्री श्रद्धा पूर्वक एकत्रित कर देवादिदेव का पूजन करे ॥ ९ ॥ जो लोग देवादिदेव का पूजन नहीं करते, वे निश्चय ही नरकगामी होते हैं। इसलिए यथाशक्ति श्रद्धापूर्वक नित्य देव-पूजा करनी चाहिए ॥ १० ॥

सं० १९५४ के माघ शुक्ल दशमी भौमवार को मैंने जयपुर में श्रीहनुमत्पूजा पद्धति का निर्माण किया ॥ ११ ॥ सज्जनों की प्रीति के लिए गौडवंशोत्पन्न रामचन्द्र के पुत्र श्रीनाथूनारायण ने इस पद्धति का निर्माण किया ॥ १२ ॥ लोक में प्राणस्वरूप श्रीकपिराज हनुमान् की कृपा से यह पद्धति जब तक पृथ्वी पर सूर्य एवं चन्द्रमा विराजमान रहें तब तक यह पद्धति अमर रहे ॥ १३॥

इस प्रकार पण्डितश्रीसन्तशरणमिश्रात्मज-पण्डितश्रीशिवदत्तमिश्रशास्त्रिकृत 'शिवदत्ती' हिन्दीव्याख्या सहित हनुमद्-रहस्य में गौडवंशावतंस चतुर्वेदि रामचन्द्रात्मज श्रीनाथूनारायणशर्माकृत हनुमत्पूजापद्धति समाप्त ।

*

हनुमत्पटलम्

अथोच्यते हनुमतो मन्त्राः सर्वेष्ट-साधकाः ।
इन्द्र-स्वरेन्दु-संयुक्तो वराहो ह-स-फाग्नयः ॥ १ ॥
झिंटीश-बिन्दु-संयुक्त द्वितीयं बीजमीरितम् ।
गादि-पान्ता-ऽग्नि-रुद्रेन्दु-संयुतः स्यात्तृतीयकम् ॥ २ ॥
ह-स-रा-मनु-चन्द्राढ्यं चतुर्थं ह-स-खाः फ-रौ ।
शिवेन्द्वाढ्यौ पञ्चमं स्यात् ह-सौ मन्विन्दुगौ परम् ॥ ३ ॥

एक समय भगवती पार्वती ने राम के अनन्यभक्तों के परम सेवनीय अंजनीसुत हनुमान् जी के मन्त्र का निरूपण करिए, इस प्रश्न के उत्तर में शंकर जी ने कहा कि हे देवि पार्वति ! आपने समस्त प्राणिमात्र के हित की इच्छा से बहुत सुन्दर प्रश्न किया, अतः राम के अत्यन्त प्रिय दूत तथा मेरे अंशभूत श्री हनुमान् जी के मन्त्र का निरूपण मैं करता हूँ, जो इस प्रकार है । इन्द्रस्वर=औ, इन्दु=ँ, वराह=ह, इस प्रकार 'इन्द्रस्वरेन्दुसंयुक्तो वराह' इस पद से 'हौं' यह प्रथम बीज, ह-स-फ=ह्स्फवर्णा, अग्नि=र, झिंटीश=ए, बिन्दु=ँ इस तरह 'ह-स-फाग्नयः झिंटीश-बिन्दुसंयुक्तं' इस पदसे 'ह्स्फ्रें' यह द्वितीय बीज, गादि=ख, पान्त=फ, अग्नि=र, रुद्र=ए, इन्दु=ँ इस प्रकार 'गादि-पान्ताऽग्नि-रुद्रेन्दु-संयुतः' इस पद से 'ख्फ्रें' यह तीसरा बीज, ह-स-रा=ह्-स्, र्, मनु=औ, चन्द्र=ँ इस प्रकार 'ह-स-रा-मनु-चन्द्राढ्य' इस पद से 'ह्स्रौं' यह चतुर्थ बीज, 'ह-स-खाः फ-रौ=ह्-स्-ख्-फ्-र्, शिव=ए, इन्दु=ँ इस तरह 'ह-स-खाः फ-रौ शिवेन्द्वाढ्यौ' इस से 'ह्स्ख्फ्रें' यह पंचम बीज, ह-सौ=ह्स्, मनु=औ, इन्दु=ँ इस प्रकार 'ह-सौ मन्विन्दु' इस पद से 'ह्-सौं' यह छठा बीज, इसी

ङेयुतो हनुमान् हार्दं मन्त्रोऽयं द्वादशाक्षरः[१] ।
रामचन्द्रो मुनिश्चाऽस्य जगतीच्छन्द ईरितः ।। ४ ।।
हनुमान् देवता बीजं षष्ठं शक्तिर्द्वितीयकम् ।
षट्बीजैरङ्गषट्कं स्यान्मूर्ध्नि भाले दृशोर्मुखे ।। ५ ।।
कण्ठे च बाहु-द्वितये हृदि कुक्षौ च नाभितः ।
लिङ्गे जानुद्वये पादद्वये वर्णान् क्रमान् न्यसेत् ।।६ ।।
षड्बीजालि-पदद्वन्द्वं मूर्ध्नि भाले मुखे हृदि ।
नाभावूर्वो-जंङ्घयोश्च पादयोर्विन्यसेत् क्रमात् ।। ७ ।।
मूलमन्त्रं समुच्चार्य सर्वाङ्गे व्यापकं चरेत् ।
ततो ध्यायेदाञ्जनेयं स्व-हृत्पद्मेऽखिलाप्तये ।। ८ ।।

प्रकार चतुर्थी विभक्ति से युक्त 'हनुमत्' शब्द के आगे हार्द='नमः' पद के योग से 'ॐ ह्रौं ह्स्फ्रें ख्फ्रें ह्स्रौं ह्स्ख्फ्रें ह्स्रौं हनुमते नमः' यह द्वादशाक्षर मन्त्र निर्मित हुआ। इस हनुमान् मन्त्र के रामचन्द्र मुनि, जगती छन्द, ।। १-४ ।। हनुमान् देवता, छह बीज तथा अंजनीसूनु शक्ति है। इन छह बीजों से युक्त द्वादशाक्षर मन्त्र के प्रत्येक वर्ण से क्रमशः मस्तक, कपाल, दोनों नेत्र, मुख, कण्ठ, दोनों भुजाएँ, हृदय, कुक्षि, नाभि, लिंग, दोनों घुटना और पैर में वर्ण न्यास करे ।। ५-६ ।।

इसी प्रकार दोनों पैर, मस्तक, कपाल, मुख, हृदय, नाभि, घुटना तथा दोनों जँघाओं में छह बीज द्वारा क्रम से न्यास करे ।।७।। इसके बाद द्वादशाक्षर मूल मन्त्र का उच्चारण कर, समस्त अंगों में आठ बार व्यापक मुद्रा प्रदर्शित करे। तदनन्तर अभीष्ट समस्त सिद्धि प्राप्ति के लिए, हृदय-कमल में स्थित, अंजनीपुत्र हनुमान् जी का इस प्रकार ध्यान करे ।। ८ ।।

---

१. 'ह्रौं ह्स्फ्रें ख्फ्रें ह्स्रौं ह्स्ख्फ्रें ह्स्रौं हनुमते नमः' इति द्वादशाक्षरो मन्त्रः श्रीहनुमतो बोद्धव्यः ।

बालार्का-ऽयुत-तेजसं त्रिभुवन-प्रक्षोभकं सुन्दरं
सुग्रीवादि-समस्त-वानरगणैराराधितं साञ्जलिम्।
नादेनैव समस्त-राक्षसगणान् सन्त्रासयन्तं प्रभुं
श्रीमद्राम-पदाम्बुज-स्मृतिरतं ध्यायामि वातात्मजम् ॥ ९ ॥

एवं ध्यात्वा जपेदर्क-सहस्रं जितमानसः।
दशांशं जुहुयाद् व्रीहीन् पयो-दध्याज्य-संयुतान् ॥१०॥
विमलादियुते पीठे पूजा कार्या हनूमतः।
केशरेष्वङ्गपूजा स्याद् दलेष्वन्यांस्तदा ह्वयान् ॥११॥
रामभक्तो महातेजाः कपिराजो महाबलः।
द्रोणाद्रिहारको मेरुपीठकार्चनकारकः ॥१२॥

ध्यान—करोड़ों बालसूर्य के समान तेजस्वी, तीनों लोक को क्षुब्ध करने वाले, अत्यन्त सुन्दर एवं हाथ जोड़े हुए, सुग्रीवादि सम्पूर्ण वानरगणों से सेवित, अपने हुंकारमात्र से ही समस्त राक्षसगणों को भयभीत करने में समर्थ, मर्यादा पुरुषोत्तम भगवान् राम के चरण-कमलों की सेवा में निरन्तर रत ऐसे वायुपुत्र हनुमान् जी का मैं ध्यान करता हूँ ॥ ९ ॥

इस प्रकार मानसिक ध्यान कर जितेन्द्रिय होता हुआ साधक को चाहिए कि वह द्वादशाक्षर मूलमन्त्र का बारह हजार जप करे। तत्पश्चात् दूध, दही, घृत मिश्रित व्रीही (चावल) से जप का दशांश (बारह सौ) हवन करे ॥ १० ॥

तत्पश्चात् विमलादियुत सिंहासन पर हनुमान् जी का पूजन करे। तथा कमलपराग में हनुमान् जी के प्रत्येक अंग का पूजन करते हुए उस अष्ट कमलदल में रामभक्त, महातेजा, महाबली

दक्षिणाशा भास्करश्च सर्वविघ्ननिवारकः ।
एवं सम्पूज्य नामानि दलाग्रेषु च वानरान् ॥१३॥
सुग्रीवमङ्गदं नीलं जाम्बवन्तं नलं तथा ।
सुषेणं द्विविदं मैन्दं पूजयेद् दिक्पतीनपि ॥१४॥
एवं सिद्धे मनौ मन्त्री स्व-परेष्टं प्रसाधयेत् ।
कदली-बीज-पूरा-ऽऽम्रफलैर्हुत्वा सहस्रकम् ॥१५॥
द्वाविंशति-ब्रह्मचारि-विप्रान् सम्भोजयेदथ ।
एवं कृते महाभूत-विष-चौराद्युपद्रवाः ॥१६॥
नश्यन्ति क्षणमात्रेण विद्वेषि-ग्रह-दानवाः ।
अष्टोत्तरशतं वारि मन्त्रितं विषनाशनम् ॥१७॥
रात्रौ नव-शतं मन्त्रं जपेद् दशदिनावधि ।

कपिराज, द्रोणाद्रिहारक, मेरुपीठकार्चनकारक, दक्षिणाशा, भास्कर और सर्वविघ्ननिवारक इन आठ नामों का पूजन कर, उस दल के अग्र भाग में सुग्रीव, अंगद, नील, जाम्ववन्त, नल, सुषेण, द्विविद, मैन्द नामक वानर तथा दश दिक्पालों का पूजन करे ॥ ११-१४ ॥ इस प्रकार साधक-गण हनुमन्मन्त्र को सिद्ध कर, अपने और दूसरे के भी इष्ट कार्य को सम्पन्न करें। कदली वीज, पूर एवं आम्रफल से हजार बार हवन कर, बाइस ब्राह्मण ब्रह्मचारियों को भोजन करावे। इस प्रकार करने पर महाभूत, विष तथा चोर आदि का उपद्रव एवं चतुर्थ, अष्टम, द्वादश स्थान स्थित क्रूरग्रह तथा दानवादिकों का भय आदि क्षणमात्र में नष्ट हो जाते हैं। एक सौ आठ बार हनुमन्मन्त्र-द्वारा अभिमन्त्रित जल विष नष्ट करने में अचूक रामबाण है ॥ १५-१७ ॥ जो साधक दस दिन तक

आगत क्रमांक.......

योो नरस्तस्य नश्यन्ति राजशत्रूत्थ-भीतयः ॥१८॥
अभिचारोत्थ-भूतोत्थ-ज्वरे तन्मन्त्रमन्त्रितैः।
भस्मभिः सलिलैर्वाऽपि ताडयेज्ज्वरिणं क्रुधा ॥१९॥
दिनत्रयाज्ज्वरान्मुक्तः स सुखं लभते नरः।
तन्मन्त्रितौषधं जग्ध्वा नीरोगो जायते ध्रुवम् ॥२०॥
तन्मन्त्रितं पयः पीत्वा योद्धुं गच्छेन्मनुं जपन्।
तज्जप्त-भस्म-लिप्ताङ्गः शस्त्रसङ्घैर्न बाध्यते ॥२१॥
शस्त्रक्षतं व्रणः शोफो लूता-स्फोटोऽपि भस्मना।
त्रिमन्त्रितेन संस्पृष्टाः शुष्यन्त्यचिरतो नृणाम् ॥२२॥
सूर्यास्तमयमारभ्य जपेत् सूर्योदयावधि।

रात्रि में नव सौ बार जप करता है उसके राजा एवं शत्रु-द्वारा की हुई समस्त आपत्तियाँ नष्ट हो जाती हैं ॥ १८ ॥ महामारी तथा भूत-प्रेतादि-जन्य ज्वर में हनुमन्मन्त्र-द्वारा अभिमन्त्रित भस्म एवं जल से अत्यन्त क्रुद्ध मुद्रा से रोगी पर तीन दिन फेंकने (छिड़कने) से उक्त रोगी निश्चय ही ज्वर से मुक्त हो सुखी होता है। उसी प्रकार हनुमन्मन्त्र-द्वारा अभिमन्त्रित औषधि के खाने से निश्चय ही रोगी रोगमुक्त हो जाता है ॥ १९-२० ॥

इसी प्रकार हनुमन्मन्त्र से अभिमन्त्रित चरणामृत का पान तथा हनुमन्मन्त्र-द्वारा अभिमन्त्रित भस्म से लिप्त प्राणी श्रीहनुमत्स्मरण करता हुआ यदि युद्ध में जाय, तो वह प्राणी शस्त्रसमूह से कभी भी पीड़ित नहीं होता ॥ २१ ॥ इतना ही नहीं अपितु तीन बार अभिमन्त्रित भस्म शरीर में लगा लेने पर उस मनुष्य के शस्त्र का घाव, व्रण (फोड़ा-फुन्सी), शोफ, महामारी बड़े-बड़े घाव आदि शीघ्र ही सूख जाते हैं ॥ २२ ॥ सुर्यास्त से

कीलकं भस्म चादाय सप्ताहावधि संयुतः ॥२३॥
निखनेत् भस्मकीलौ तौ विद्विषां द्वार्यलक्षितः ।
विद्वेषमित्थमायान्ति पलायन्तेऽरयो चिरात् ॥२४॥
अभिमन्त्रित-भस्माम्बु देहचन्दनसंयुतम् ।
खाद्यादि-योजितं यस्मै दीयते[1] सततं ज्वरात् ॥२५॥
क्रूराश्च जन्तवोऽनेन भवन्ति विधिना वशाः ।
ईशान-दिक्स्थमूलेन भूताङ्कुशतरोः शुभाम् ॥२६॥
अङ्गुष्ठमात्रां प्रतिमां प्रविधाय हनूमतः ।
प्राणसंस्थापनं कृत्वा सिन्दूरैः परिपूज्य च ॥२७॥
गृहस्याऽभिमुखीं द्वारे निखनेन्मन्त्रमुच्चरन् ।
भूता-ऽभिचार-चौरा-ऽग्नि-विषरोग-नृपोद्भवाः ॥२८॥

लेकर सूर्योदय पर्यन्त सात दिन तक जप करता हुआ प्राणी भस्म एवं कील (काँटा) को लेकर शत्रु के द्वार पर बिना जाने हुए गाड़ देने से शत्रु वश में होते हैं तथा शीघ्रातिशीघ्र भाग जाते हैं ॥ २३-२४ ॥ हनुमन्मन्त्र जपने वाले प्राणी के शरीर में लगे हुए चन्दन एवं हनुमन्मन्त्राभिमन्त्रित भस्मजल ज्वराक्रान्तप्राणी को भोजन के पूर्व इन वस्तुओं को देने से ज्वर नष्ट होता है। और इसी विधि से क्रूर जन्तु आदि वश में होते हैं। ईशानकोण में स्थित करंज वृक्ष के नीचे श्रीहनुमान् की अंगुष्ठ प्रमाण सुन्दर मूर्ति बनाकर तथा विधि-विधान से उसकी प्राणप्रतिष्ठा कर, सिन्दूर आदि से भलीभाँति पूजन कर, मूल मन्त्र का जप करता हुआ गृहद्वार के सम्मुख उस मूर्ति को गाड़ देने से भूत-प्रेतादि दोष,

---

१. 'स च दासवत्' इति पाठान्तरम् ।

सञ्जायन्ते गृहे तस्मिन्न कदाचिदुपद्रवाः ।
प्रत्यहं धन-पुत्राद्यैरेधते तद्गृहं चिरम् ॥२६॥
निशि स्मशान-भूमिस्थ-भस्मना मृत्स्नयाऽपि वा ।
शत्रोः प्रतिकृतिं कृत्वा हृदि नाम समालिखेत् ॥३०॥
कृतप्राणप्रतिष्ठां तां भिन्द्याच्छस्त्रैर्मनुं जपन् ।
मन्त्रान्ते प्रोच्चरेच्छत्रोर्नाम छिन्धि च भिन्धि च ॥३१॥
मारयेति च तस्याऽन्ते दन्तैरोष्ठं निपीडच च ।
पाण्योस्तले प्रपीडचाऽथ त्यक्त्वा तां सदनं व्रजेत् ॥३२॥
एवं सप्तदिनं कुर्वन् हन्याच्छत्रुं शिवेप्सितम् ।
अर्धचन्द्राकृतौ कुण्डे स्थण्डिले वा हुतं चरेत् ॥३३॥

चोर, अग्नि, विषजन्य रोग, राजभय आदि उपद्रव उस गृह में कभी भी नहीं होते । तथा उस घर में प्रति दिन निरन्तर धन, पुत्र आदि बढ़ते ही रहते हैं ॥ २५-२६ ॥

रात्रि में स्मशान भूमि की चिता की भस्म अथवा मिट्टी से शत्रु की मूर्ति बनाकर, उस मूर्ति के हृदय में शत्रु का नाम लिखे। तत्पश्चात् उस मूर्ति की प्राणप्रतिष्ठा कर, हनुमन्मन्त्र को जपता हुआ, एवं मन्त्र के अन्त में शत्रु का नाम लेता हुआ तथा 'छिन्ध भिन्धि मारय' इस प्रकार कहता हुआ शस्त्र द्वारा उस प्रतिमा को काटे। तदनन्तर उस प्रतिमा के दाँत, ओठ, हथेली आदि को दबाकर और उसको स्मशान में ही छोड़कर, अपने घर जाये। इस प्रकार सात दिन तक शंकर द्वारा निर्दिष्ट इस विधि को करता हुआ शत्रु को नष्ट करे ॥ ३०-३२½ ॥ स्मशान में मुक्त केश होते हुए नमक, राई, धतूरे का फल, पुष्प, नख, रोम, विष, कौवा, उलूक, गीध के पंख,

मुक्तकेशः श्मशानस्थो लवणैराजिकायुतैः ।
उन्मत्त-फल-पुष्पैश्च नख-रोम-विषैरपि ॥३४॥
काक-कौशिक-गृध्राणां पक्षैः श्लेष्मान्तकाक्षजैः ।
समिद्वरैश्च त्रिशतं दक्षिणाशामुखो निशि ॥३५॥
सप्तघस्रानिदं कुर्यान्मारयेद्रिपुमुद्धतम् ।
शतषट्कं जपेद्रात्रौ श्मशाने दिवसत्रयम् ॥३६॥
ततो वेताल उत्थाय वदेद्भावि शुभाऽशुभम् ।
उदितं कुरुते सर्वं किङ्करीभूय मन्त्रिणः ॥३७॥
हनुमत्प्रतिमां भूमौ विलिखेत् तत्पुरो मनुम् ।
साध्यनाम द्वितीयान्तं विमोचय विमोचय ॥३८॥
तत्सर्वं मार्जयेद् वामहस्तेनाऽथो पुनर्लिखेत् ।
एवमष्टोत्तरशतं लिखित्वा मार्जयेत् पुनः ॥३९॥

श्लेष्मान्तक, अक्षज, सुन्दर तीन सौ समिधा की लकड़ी से दक्षिण मुख होकर सात रात्रि पर्यन्त अर्ध चन्द्राकार वाले कुण्ड एवं वेदी में हवन करने से उद्दण्ड शत्रु का भी मारण अवश्य होता है ॥ ३२½-३५½ ॥

तीन दिन तक स्मशान में छह सौ जप रात्रि में करने के बाद वेताल स्वयं प्रकट होकर, भविष्य के शुभाशुभका वर्णन करता है। तथा मन्त्र जप करने वाले पुरुष का वह वेताल सदा के लिए सेवक बन कर उसका समस्त कार्य करता है ॥ ३५½-३७ ॥ कारागार में पड़े हुए मनुष्य का नाम द्वितीयान्त पद से लिखकर, उसके आगे 'विमोचय विमोचय, ऐसा लिखकर, बाँये हाथ द्वारा जल से भूमि में लिखे हुए मन्त्र युक्त हनुमत्प्रतिमा का मार्जन करे। इसी प्रकार एक सौ आठ बार उसी प्रकार लिखकर मार्जन करने से उपर्युक्त

एवं कृते पराधीनो मुच्यते निगडात् क्षणात् ।
एवं विद्वेषणादीनि कुर्यात् तत्पल्लवं लिखन् ॥४०॥
वश्यार्थं सर्षपैर्होमो विद्वेषे करवीरजैः ।
कुसुमैरिध्मकाष्ठैर्वा जीरकैर्मरिचैरपि ॥४१॥
ज्वरे दूर्वा-गुडू-जीभिर्दध्ना क्षीरेण वा घृतैः ।
शूले होमः कुबेराक्षैरेरण्ड-समिधा तथा ॥४२॥
तैलाक्ताभिश्च निर्गुण्डीसमिद्भिर्वा प्रयत्नतः ।
सौभाग्यचन्दनैश्चन्द्रै रोचनैला-लवङ्गकैः ॥४३॥
सुगन्धपुष्पैर्वस्त्राप्तौ तत्तद्धान्यैस्तदाप्तये ।

मनुष्य शीघ्र ही कारागार (जेलखाने) के बन्धन से मुक्त हो जाता है ॥ ३८-३९½ ॥

इसी तरह मारण, मोहन, वशीकरण, उच्चाटन आदि के लिए द्वितीयान्त साध्य नाम के आगे 'मारय मारय, मोहय मोहय, उच्चाटय उच्चाटय, नाशय नाशय, विद्रावय विद्रावय' आदि पदों से युक्त हनुमन्मन्त्र के जप करने से उस साधक के समस्त कार्य सिद्ध होते हैं ॥ ३९½ ४० ॥

वशीकरण के लिए सरसों, विद्वेषण (मारण) के लिए करंज, कुसुम पुष्प, इध्मकाष्ठ, जीरा, मीरिच, ज्वर के लिए दूब, गुरूच, दही, दूध, घृत, शूल के लिए कुबेराक्ष ('सागर गोटा' महाराष्ट्र भाषा में), रेंड़, निर्गुण्डी, समिधा, तेल में डुबे हुए उपर्युक्त वस्तुएँ हवन करे ॥ ४१-४२½ ॥ जिस-जिस अन्न की प्राप्ति करने की इच्छा हो उस-उस अन्न द्वारा हवन करने से उस अन्न की प्राप्ति होती है। वस्त्र प्राप्ति के लिए सौभाग्य चन्दन, कपूर, गोरोचन, इलायची, लवंग तथा सुगन्धित पुष्प से हवन करे। राजीव

तत्पादरजसा राजीलवणाक्तेन मृत्यवे ॥४४॥
किं बहूक्तैर्विषे व्याधौ शान्तौ मोहे च मारणे ।
विवादे स्तम्भने द्यूते भूतभीतौ च सङ्कटे ॥४५॥
वश्ये युद्धे नृपद्वारे समरे वैरिसङ्कटे ।
मन्त्रोऽयं साधितो दद्यादिष्टसिद्धिं नृणां ध्रुवम् ॥४६॥
वक्ष्ये हनुमतो यन्त्रं सर्वसिद्धिप्रदायकम् ।
वलयत्रितयं लेख्यं पुच्छाकारसमन्वितम् ॥४७॥
साध्यनाम लिखेन्मध्ये पाशबीजप्रवेष्टितम् ।
उपर्यष्टदलं कृत्वा वर्म पत्रेषु संलिखेत् ॥४८॥
वलयं बहिरालिख्य तद्बहिश्चतुरस्रकम् ।
चतुरस्रस्य रेखाग्रे त्रिशूलानि समालिखेत् ॥४९॥

(कमल), नमक से युक्त शत्रु के पैर की धूलि से हवन करने से निश्चय ही शत्रु मर जाता है ॥ ४२½-४४ ॥ और कहाँ तक निरूपण किया जाय, उक्त हनुमन्मन्त्र सिद्ध होने पर साधक के समस्त इष्ट कार्य को निश्चय ही सिद्ध करता है तथा विष, व्याधि, शान्ति, मोहन, मारण, विवाद, स्तम्भन, जूआ, भूत-व्याधिभय, संकट, वशीकरण, युद्ध, राजद्वार, युद्धस्थल एवं शत्रु द्वारा प्राप्त संकट आदि शीघ्र नष्ट होते हैं ॥ ४५-४६ ॥

यन्त्रविधान—समस्त सिद्धिप्रदायक हनुमद्यन्त्र के विधान का निरूपण करते हैं—सर्व प्रथम पुच्छाकार युक्त वलय-त्रितय में 'आम्' बीज से युक्त उस वलयत्रितय के मध्य साध्य का नाम लिखे। उसके ऊपर अष्टदल कमल का निर्माण कर, उसके प्रत्येक पँखुड़ियों में वर्मबीज (हुम्) लिखे ॥ ४७-४८ ॥ तदनन्तर उन पत्रों के बाहर वलय निर्माण कर, और उस वलय के बाहर चतुरस्रक रेखा का निर्माण कर, उन प्रत्येक रेखाओं के अग्रभाग में त्रिशूल बनावे

भूपुरस्याऽष्टवज्रेषु ह्सौं बीजं लिखेत्ततः ।
कोणेष्वङ्कुशमालिख्य मालामन्त्रेण वेष्टयेत् ॥ ५० ॥
तत्सर्वं वेष्टयेद्यन्त्रं बलयत्रितयेन च ।
वस्त्रे शिलायां फलके ताम्रपात्रेऽथ कुड्यजे ॥ ५१ ॥
भूर्जे वा ताडपत्रे वा रोचनानाभिकुङ्कुमैः ।
यन्त्रमेतन्समालिख्य त्यक्ताशी ब्रह्मचर्यवान् ॥ ५२ ॥
कपेः प्राणान् प्रतिष्ठाप्य पूजयेत्तद्यथाविधि ।
सर्वदुःखनिवृत्त्यैतद्-यन्त्रमात्मनि धारयेत् ॥ ५३ ॥
ज्वरमार्यभिचारघ्नं सर्वोपद्रवशान्तिकृत् ।
योषितामपि बालानां धृतं जनमनोहरम् ॥ ५४ ॥
मालामन्त्रमथो वक्ष्ये प्रणवो वाग्घरिप्रिया ।

॥ ४९ ॥ यन्त्रस्थित अष्टदल कमल के प्रत्येक दल में 'ह् सौं' इस बीज मन्त्र को लिखकर, तत्पश्चात् कोण में अंकुश का निर्माण कर, माला मन्त्र से वेष्टित करे। उस मन्त्र को तीन वलय (घेरा) से वेष्टित करे। उस यन्त्र का निर्माण-वस्त्र, चिकनी शिला, पीढ़ा, ताँबे का पत्र एवं दीवाल में भोजपत्र अथवा ताड़ पत्र में गोरोचन, कस्तूरी तथा कुंकुम आदि से लोभरहित ब्रह्मचर्य का पालन करता हुआ (निर्माण) करे ॥ ५०-५२ ॥ तत्पश्चात् हनुमन्मूर्ति की प्राणप्रतिष्ठा एवं यथाविधि षोडशोपचार से पूजन कर, समस्त कष्ट निवारण के लिए उस यन्त्र को धारण करे ॥ ५३ ॥ जो पुरुष, बालक तथा स्त्रियाँ इस परम सुन्दर यन्त्र को धारण करती हैं, उनके समस्त उपद्रव, ज्वर एवं आधि-व्याधि आदि शान्त होते हैं ॥ ५४ ॥ तत्पश्चात् मालामन्त्र का निरूपण करते हैं। सर्वप्रथम प्रणव (ॐ) का उच्चारण करता हुआ वाक् (ऐं), हरि-

दीर्घत्रयान्विता माया पूर्वोक्तं कूटपञ्चकम् ॥५५॥
तारो नमो हनुमते प्रकटान्ते पराक्रम ।
आक्रान्त-दिग्मण्डलतो यशोवीति च तान च ॥ ५६ ॥
धवलीकृतवर्णान्ते जगत्त्रितयवज्रदे ।
हान्ते ज्वलदग्निसूर्यकोट्यन्ते तु समप्रभ ॥ ५७ ॥
तनूरुहपदं रुद्रावतारपदमीरयेत् ।
लङ्कापुरीदहान्ते नोदधिलङ्घनवर्णकाः ॥ ५८ ॥
दशग्रीवशिरः पश्चात् कृतान्तकपदं ततः ।
सीता-श्वासन-वाय्वन्ते सुतं शब्दमुदीरयेत् ॥ ५९ ॥
अञ्जनीगर्भसम्भूत-श्रीसमान्ते तु लक्ष्मणा ।
नन्दकान्ते करकपि-सैन्य-प्राकारवर्णकाः ॥ ६० ॥
सुग्रीवसख्यकावर्णा रणवालिनिबर्हण ।
कारणद्रोणपर्वान्ते तोत्पाटनपदं वदेत् ॥ ६१ ॥

प्रिया (श्रीं) तथा दीर्घत्रयान्विता माया बीज (ह्रां ह्रीं ह्रूं) एवं पूर्वोक्त पंचबीजात्मक हनुमन्मन्त्र के उच्चारण से 'ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं ह स्फ्रें ख्फ्रें ह स्रौं हृ् स्ख्फ्रें ह् सौं ॐ हनुमते नमः' यह माला मन्त्र निर्मित हुआ इस मन्त्र के आगे 'प्रकटाय, पराक्रमाय, आक्रान्तदिङ्मण्डलाय, यशोवीतिवितानाय, धवलीकृतवर्णाय, जगत्त्रितयाय, वज्रदाय, हान्ताय, ज्वलदग्निसूर्यकोटये, समप्रभाय, ॥ ५५-५७ ॥ तनूरुहपदाय, रुद्रावताराय, लङ्कापुरीदहनाय, नोदधि-लङ्घनाय, दशग्रीवशिरःकृतान्तकाय, सीताश्वासनाय, वायुसुताय, ॥ ५८-५९ ॥ अञ्जनीगर्भसम्भूताय, श्रीरामलक्ष्मणानन्दकारकाय, कपिसैन्यप्राकारकाय, सुग्रीवसख्यकाय, रणवालिनिबर्हणकारणाय,

अशोकवनवीत्यन्ते दारणाक्षकुमारक ।
छेदनान्ते वनपदं रक्षाकरसमूह च ॥ ६२ ॥
विभञ्जनान्ते ब्रह्मास्त्र-ब्रह्मशक्तिग्रसेति च ।
लक्ष्मणान्ते शक्तिभेदनिवारणपदं पुनः ॥ ६३ ॥
विशल्यौषधिवर्णान्ते समानयनवर्णकाः ।
बालोदितान्ते भान्वन्ते मण्डलग्रसनेति च ॥ ६४ ॥
मेघनादेति होमान्ते विध्वंसनपदं वदेत् ।
इन्द्रजिद्वधकारान्ते णसीतारक्षकेति च ॥ ६५ ॥
राक्षसीसङ्घवर्णान्ते विदारण च कुम्भ च ।
कर्णादिवधशब्दान्ते परायणपदं वदेत् ॥ ६६ ॥
श्रीरामभक्तिशब्दान्ते तत्परेति समुद्र च ।
व्योमद्रुमलङ्घनेति महासामर्थ्यमेति च ॥ ६७ ॥
हातेजः पुञ्जवीत्यन्ते राजमानपदं पुनः ।
स्वामिवचन-सम्पादितार्जुनान्ते च संयुग ॥ ६८ ॥
सहायान्ते कुमारेति ब्रह्मचारीपदं वदेत् ।
गम्भीरशब्दोऽग्निर्वायुर्दक्षिणाशापदं पुनः ॥ ६९ ॥

द्रोणपर्वतोत्पाटनाय, अशोकवनविदारणाय, अक्षकुमारच्छेदनाय, वनरक्षाकरसमूहविभञ्जनाय, ब्रह्मास्त्र-ब्रह्मशक्तिग्रसाय, लक्ष्मणशक्ति-भेदनिवारणाय ॥६०-६३॥ विशल्यौषधिसमानयनाय, बालोदित-भानुमण्डलग्रसनाय, मेघनादहोमविध्वंसनाय, इन्द्रजिद्वधकाराय, सीता-रक्षकाय, राक्षसीसङ्घविदारणाय, कुम्भकर्णवधपरायणाय ॥ ६४-६६ ॥ श्रीरामभक्तितत्पराय, समुद्रव्योमद्रुमलङ्घनाय, महासामर्थ्याय, महा-तेजपुञ्जविराजमानाय, स्वामिवचनसम्पादिताय, अर्जुनसंयुगसहायाय,

मार्तण्डमेरुशब्दान्ते पर्वतेति पदं वदेत् ।
पीठिकार्चनवर्णान्ते सकलेति पदं पुनः ॥ ७० ॥
मन्त्रागमाचार्यं मम सर्वग्रहविनाशन ।
सर्वज्वरोच्चाटनेति सर्वविषविनाशन ॥ ७१ ॥
सर्वापत्तिनिवारण सर्वदुष्टेति सम्पठेत् ।
निबर्हणपदं सर्प-व्याघ्रादिभय-तत्परम् ॥ ७२ ॥
निवारणसर्वशत्रूच्छेदनेति पदं मम ।
परस्य च त्रिभुवनं पुं-स्त्री-नपुंसकात्मकम् ॥ ७३॥
सर्वजीवपदं पश्चात् जातं वशययुग्मकम् ।
ममाज्ञाकारकं पश्चात्सम्पादयपदत्रयम् ॥ ७४ ॥
नाना-नामपदं धेयान् सर्वान् राज्ञः स सम्पठेत् ।
परिवारान् ममेत्यन्ते सेवकान् कुरुयुग्मकम् ॥ ७५ ॥
सर्वशस्त्रास्त्रवीत्यन्ते पाणि विध्वंसयद्वयम् ।
माया दीर्घत्रयोपेता ह्रात्रयं चैहियुग्मकम् ॥ ७६ ॥
विलोमपञ्चकूटानि सर्वशत्रून् हनद्वयम् ।

कुमारब्रह्मचारिणे, गम्भीराय, अग्निर्वायु-दक्षिण-मार्त्तण्ड-मेरुपर्वताय, पीठिकार्चन-सकलमन्त्रागमाचार्याय, मम सर्वग्रहविनाशनाय, सर्वापत्ति-निवारणाय, सर्वदुष्टनिवर्हणाय, सर्प-व्याघ्रादिभयनिवारणाय, सर्व-शत्रूच्छेदनाय, मम परस्य च त्रिभुवन-पुं-स्त्री-नपुंसक-सर्वजीवजातं वशय वशय, ममाज्ञां सम्पादय, सम्पादय, सम्पादय, ॥ ६७-७४ ॥
नानानामधेयान् सर्वान् राज्ञः परिवारान् मम सेवकान् कुरु कुरु ॥७५॥
सर्वशस्त्रास्त्रविषाणि विध्वंसय विध्वंसय, ॐ ह्लां ह्लीं ह्लूं ह स्फ्रें ह्स्ख्फ्रें ह् सौं एहि एहि ॐ ह सौं ह स्ख्फ्रें ह स्रौं ख्फ्रें ह् स्फ्रें सर्वशत्रून्

परबान्ते लानि परसैन्यानि क्षोभयद्वयम् ॥ ७७ ॥
मम सर्वं कार्यजातं साधयद्वितयं ततः ।
सर्वदुष्टदुर्जनान्ते मुखानि कीलयद्वयम् ॥ ७८ ॥
घेत्रयं हात्रयं वर्मत्रितयं फट्त्रयं ततः ।
वह्निप्रियान्तो मन्त्रोऽयं मालासंज्ञोऽखिलेष्टदः ॥ ७९ ॥
अष्टाशीत्युत्तराः पञ्चशतवर्णा मनोः स्मृताः ।
महोपद्रवसम्पाते स्मृतोऽयं दुःखनाशनः ॥ ८० ॥
द्वादशार्णेतिमान् वर्णान् षट् त्यक्त्वैकं तथादिमम् ।
पञ्चकूटात्मको मन्त्रो निखिलाऽभीष्टसाधकः ॥ ८१ ॥
मुनी रामोऽथ गायत्री छन्दो देवः कपीश्वरः ।
पञ्चबीजैः समस्तेन षडङ्गं मुनिभिः स्मृतम् ॥ ८२ ॥
रामदूतो लक्ष्मणान्ते प्राणदाताऽञ्जनीसुतः ।

हन हन परबलानि परसैन्यानि क्षोभय क्षोभय ॥ ७६-७७ ॥ मम सर्वं कार्यजातं साधय साधय, सर्वदुष्टदुर्जनमुखानि कीलय कीलय, ॥ ७८ ॥ घे घे घे, हा, हा हा रक्ष रक्ष रक्ष, फट् फट् फट्, स्वाहा– इस मन्त्र का नाम माला मन्त्र है। इसमें ५८८ वर्ण हैं। यह मन्त्र महान् उपद्रव एवं दुःख को नाश करनेवाला है ॥ ७९-८० ॥ 'हनुमते नमः' इन छह वर्ण एवं 'हौं' इस प्रथम वर्ण का परित्याग कर, अवशिष्ट बारह वर्ण वाले 'ह् स्फ्रें ख्फ्रें ह् स्त्रौं ह् स्ख्फ्रें ह् सौं' यह पंच कूटात्मक मन्त्र है, जो कि समस्त अभीष्टसिद्धि प्रदायक है ॥ ८१ ॥

इस हनुमन्मन्त्र के रामचन्द्र ऋषि, गयत्री छन्द तथा कपीश्वर देवता हैं। ऋषियों ने इस प्रकार पञ्चबीज-द्वारा षडंग हृदयादि-न्यास का विधान बताया है ॥ ८२ ॥ 'रामदूताय, लक्ष्मणप्राणदात्रे,

---

१. 'ह् स्फ्रें ख्फ्रें ह् स्त्रौं' ह् स्ख्फ्रें ह् सौं' इत्ययं पञ्चकूटात्मको मन्त्रः ।

सीताशोकविनाशोऽथ लङ्काप्रासादभञ्जनः ॥ ८३ ॥
हनूमदाद्याः पञ्चैते बीजाद्या ङेसमन्विताः ।
षडङ्गमन्त्राः सन्दिष्टा ध्यान-पूजादि पूर्ववत् ॥ ८४ ॥
तारो वाक्कमला माया दीर्घत्रयसमन्विता ।
पञ्चैकूटानि मन्त्रोऽयं [1]रुद्रार्णोऽभीष्टसिद्धिदः ॥ ८५ ॥
अर्चनं पूर्ववच्चास्य परो मन्त्रोऽभिधीयते ।
हृदयं भगवान् ङेऽन्त आञ्जनेयमहाबलौ ॥ ८६ ॥
ङेऽन्तौ वह्निप्रियान्तोऽयं मनुरष्टादशाक्षरः[2] ।
मुनिरीश्वर एवास्याऽनुष्टुप्-छन्दः समीरितः ॥ ८७ ॥
हनुमान् देवता बीजं हुं शक्तिर्वह्निवल्लभा ।

अञ्जनीसुताय, सीताशोकविनाशाय, लङ्काप्रासादभञ्जनाय, हनुमते नमः' आदि पञ्चबीज से युक्त यह षडंग मन्त्र ऋषियों ने कहा है। पूर्ववत् इसका भी ध्यान, पूजन करना चाहिए ॥ ८३-८४ ॥ 'ॐ ऐं श्रीं ह्रां ह्रीं ह्रं हस्फ्रें ख्फ्रें ह स्रौं ह स्ख्फ्रें ह सौं' यह पञ्चकूटात्मक मन्त्र समस्त अभीष्टसिद्धि प्रदायक ऋषियों द्वारा एकादशाक्षरात्मक मन्त्र बताया है। इस मन्त्र का भी पूर्ववत् पूजन करे ॥ ८५ ॥

तत्पश्चात् अष्टादशाक्षरात्मकमन्त्र का निरूपण भी ऋषियों द्वारा किया गया है, जो इस प्रकार है—'ॐ नमो भगवते आञ्जनेयाय महाबलाय स्वाहा'। इस मन्त्र के ऋषि ईश्वर, अनुष्टुप् छन्द, हनुमान् देवता, हुं बीज तथा स्वाहा शक्ति है। पश्चात् 'आञ्जनेयाय

---

१. 'ॐ ऐं श्रीं ह्रा ह्रीं ह्रू ह्स्फ्रें ख्फ्रें ह्स्रौं ह्स्ख्फ्रें ह्सौं' इत्ययमेकादशाक्षरस्य हनुमतो मन्त्रः।

२. 'नमो भगवते आञ्जनेयाय महाबलाय स्वाहा' इत्यमष्टादशाक्षरो मन्त्रः ज्ञेयः ।

आञ्जनेयो रुद्रमूर्तिर्वायुपुत्रस्तथैव च ॥ ८८ ॥
अग्निगर्भो रामदूतो ब्रह्मास्त्रविनिवारणः ।
एतैङ्र्न्तैः षडङ्गानि कृत्वा ध्यायेत् कपीश्वरम् ॥ ८९ ॥
दहन-तप्त-सुवर्ण-समप्रभं भयहरं हृदये विहिताञ्जलिम् ।
श्रवणकुण्डलशोभि-मुखाम्बुजं नमत वानरराजमिहाऽद्भुतम्॥९०॥
अयुतं प्रजपेन्मन्त्रं दशांशं जुहुयात्तिलैः ।
वैणवे पूजयेत् पीठे पूर्ववत् कपिनायकम् ॥ ९१ ॥
जितेन्द्रियो नक्तभोजी प्रत्यहं साष्टकं शतम् ।
जपित्वा क्षुद्ररोगेभ्यो मुच्यते दिवसत्रयात् ॥ ९२ ॥
भूत-प्रेत-पिशाचादि-नाशायैवं समाचरेत् ।
महारोगनिवृत्त्यै तु सहस्रं त्रिदिनं जपेत् ॥ ९३ ॥

रुद्रमूर्तये, वायुपुत्राय, अग्निगर्भिणे, रामदूताय, ब्रह्मास्त्रविनिवारणाय' इन छह पदों से हृदयादि षडंग न्यास कर, कपीश्वर हनुमान् जी का इस प्रकार ध्यान करे ॥ ८६-८९ ॥ तपे हुए सुवर्ण के समान कान्ति-वाले, भयविनाशक, हृदय पर अंजलि बाँधे हुए, कानों में धारण किये हुए कुण्डल से अत्यन्त सुशोभित मुखकमल वाले तथा अद्भुत स्वरूप युक्त वानरराज को आप सभी प्रणाम करें ॥ ९० ॥ उक्त मन्त्र का दस हजार जप कर, तिल से तद्दशांश हवन करे और काष्ठ के सिंहासन पर कपिनायक हनुमान् जी का स-विधि पूजन करे ॥ ९१ ॥ साधक को चाहिए कि वह जितेन्द्रिय होता हुआ जपानुष्ठान के समय केवल रात्रि में ही भोजन करे। तथा प्रतिदिन एक सौ आठ बार तीन दिन तक उक्त मन्त्र का जप करने से क्षुद्ररोग, भूत, प्रेत, पिशाच आदि नष्ट होते हैं। इसी प्रकार तीन दिन तक सहस्र (हजार) बार जप करने से भयंकर राज रोग आदि की निवृत्ति होती है ॥९२-९३॥

जितासनोऽयुतं नित्यं जपन् ध्यायन् कपीश्वरम् ।
राक्षसौघं विनिघ्नन्तमचिराज्जयति द्विषः ।। ९४ ।।
सुग्रीवेण समं रामं सन्दधानं स्मरन् कपिम् ।
प्रजप्याऽयुतमात्रं तु सन्धिं कुर्याद् विरुद्धयोः ।। ९५ ।।
लङ्कां दहन्तं तं ध्यायन्नयुतं प्रजपन् मनुम् ।
शत्रूणां प्रदहेद् ग्रामानचिरादेव साधकः ।। ९६ ।।
प्रयाणसमये ध्यायन् हनूमन्तं मनुं जपन् ।
यो याति सोऽचिरात् स्वेष्टं साधयित्वा गृहं व्रजेत् ।। ९७ ।।
यः कपीशं सदा गेहे पूजयेज्जपतत्परः ।
आयुर्लक्ष्म्यौ प्रवर्धेते तस्य नश्यन्त्युपद्रवाः ।। ९८ ।।
शार्दूल-तस्करादिभ्यो रक्षेन्मनुरयं स्मृतः ।

जितासन होकर कपीश्वर श्रीहनुमान् जी का ध्यान करता हुआ, दस हजार जप करने से समस्त राक्षसगण एवं शत्रु शीघ्र ही नष्ट होते हैं ।।९४।। इसी प्रकार सुग्रीव सहित राम एवं हनुमान् का ध्यान करते हुए अयुत (दस हजार) मात्र जपकरने से परस्पर विरुद्ध मतवाले प्राणियों में सन्धि होती है ।। ९५ ।। इसी तरह लंका-दहन करते हुए हनुमान् का ध्यान कर, दश हजार जप करने से तत्क्षण शत्रुओं का ग्राम जल कर नष्ट हो जाता है ।। ९६ ।। जो मनुष्य घर से बाहर निकलते समय हनुमान् जी का जप करके जाता है, वह अपनी इष्ट-सिद्धि प्राप्त कर सकुशल घर लौट आता है ।। ९७ ।। जो प्राणी जपपरायण होता हुआ अपने घर हनुमान् जी का पूजन करता है, उसकी आयु और लक्ष्मी निरन्तर बढ़ती रहती है तथा उसके समस्त उपद्रव नष्ट हो जाते हैं ।। ९८ ।। इस हनुमन्मन्त्र के जप करने से सिंह, चोर आदि का भय नहीं होता, एवं शयन करने पर

प्रस्वापकाले चौरेभ्यो दुष्टस्वप्नादपि ध्रुवम् ॥ ९९ ॥
पवनद्वितयं सद्योजातयुक्तं हनूपदम् ।
महाकालः शशाङ्काढ्यः कामिका फलफ-क्रिया ॥१००॥
स-नेत्रा णान्तमीनौ ग सात्वतो गित-आयुरा ।
ष लोहितं रुडाहेति वेदनेत्राक्षरो मनुः ॥१०१॥
प्लीहरोगहरस्याऽस्य मुन्याद्यं पूर्ववन्मतम् ।
प्लीहयुक्तोदरे स्थाप्यं नागवल्लीदलं शुभम् ॥१०२॥
तदुपर्यष्टगुणितं वस्त्रमाच्छादयेत्ततः ।
वंशजं शकलं तस्योपरि मुञ्चेत् कपिं स्मरन् ॥१०३॥
आरण्यप्रस्तरोत्पन्ने वह्नौ यष्टिं प्रतापयेत् ।
बदरीतरुसम्भूतां मन्त्रेणाऽनेन सप्त यः ॥१०४॥
तया सन्ताडयेद् वंश-शकलं जठरस्थितम् ।
सप्तकृत्वः प्लीहरोगो नश्यत्येव नृणां क्षणात् ॥१०५॥

दुष्ट स्वप्न, चोर आदि का भय निश्चय ही नष्ट होता है ॥ ९९ ॥

चौबीस वर्ण वाले 'यो यो हनुमन्त-फलफलित-धगधगित-आयुराषपरुडाह' यह प्लीहा (बरवट) रोगनाशक मन्त्र पान के पत्ते पर रोगी के उदर (पेट) में स्थापित कर, उसे अष्टगुणित वस्त्र से आच्छादित करे। तथा हनुमान् जी का स्मरण करते हुए कच्चे बाँस के टुकड़े, उस वस्त्र पर रखे ॥१००-१०३॥

तत्पश्चात् बदरी (बेर) वृक्ष के डण्डे को जंगली पत्थर से उत्पन्न अग्नि में तपाकर, चौबीस वर्णवाले इस मन्त्र से सात बार रोगी के पेट पर रखे हुए, उन बाँस के टुकड़ों को ताडित (मारने से) करने से तत्क्षण रोगी प्लीहा रोग से मुक्त हो जाता है ॥ १०४-१०५॥

पुच्छाकारे सुवसने लेखिन्या कोकिलोत्थया ।
अष्टगन्धैर्लिखेद्रूपं कपिराजस्य सुन्दरम् ॥१०६॥
तन्मध्येऽष्टादशार्णं तु शत्रुनामयुतं लिखेत् ।
तेन मन्त्रप्रजप्तेन शिरोबद्धेन भूमिपः ॥१०७॥
जयत्यरिगणं सर्वं दर्शनादेव निश्चितम् ।
युद्धं जिगीषुर्नृपतिः पूर्वोक्तं लेखयेद् ध्वजे ॥१०८॥
ध्वजमादायोपरागे संस्पर्शान्मोक्षणावधि ।
मातृकां जापयेत् पश्चाद् दशांशेन हुतं चरेत् ॥१०९॥
सर्षपैस्तिल-सम्मिश्रैः संस्कृते हव्यवाहने ।
गजस्थं तं ध्वज दृष्ट्वा पलायन्तेऽरयोऽचिरात् ॥११०॥
अथो हनुमतो मन्त्रं वक्ष्ये रक्षाविधायकम् ।

कोयल के पंख की कलम से अष्टगन्ध द्वारा हनुमान् जी की सुन्दर मूर्ति पुच्छाकार वस्त्र पर बनाकर, उस मूर्ति के मध्य अष्टादश वर्ण वाले मन्त्र के मध्य में शत्रु का नाम लिखकर राजा पगड़ी बाँधकर इस मन्त्र का जप करे, जिससे उस मूर्ति के दर्शन मात्र से ही वह राजा समस्त शत्रुगणों पर निश्चय ही विजय प्राप्त करता है। उसी प्रकार युद्ध में विजय प्राप्त करने वाले राजा को चाहिए कि ध्वजा पर अठारह वर्ण वाले मन्त्र के मध्य में शत्रु का नाम लिखकर, जब तक वह सूख न जाय तब तक ध्वजा को हाथ में लेकर हाथी पर रख दे। पश्चात् मातृका जप कर अग्नि में सरसों, तिल मिले हुए शाकल से दशांश हवन करे। रणस्थल में उस राजा के शत्रुगण हाथी पर स्थित उस ध्वजा को देखते ही तत्क्षण भाग जाते हैं ॥ १०६-११० ॥

इसके बाद रक्षाविधायक हनुमान् जी के मन्त्र का विधान

लिखेदष्टदलं पद्मं साध्याख्याऽयुतकर्णिकम् ॥१११॥
दलेष्वष्टार्णमालिख्य मालामन्त्रेण वेष्टयेत् ।
तद्बहिर्मायया वेष्ट्य प्राणस्थापनमाचरेत् ॥११२॥
लिखितं स्वर्णलेखिन्या दले भूर्जतरोः शुभे ।
रोचना-कुङ्कुमाभ्यां च वेष्टितं कनकादिभिः ॥११३॥
सम्पात-साधितं यन्त्रं भुजे वा मूर्ध्नि धारयेत् ।
रणे जयमवाप्नोति व्यवहारे दुरोदरे[1] ॥११४॥
ग्रहैर्विघ्नैर्विषैः शस्त्रैश्चौरैर्नैवाभिभूयते ।
रोगान् सर्वान् पराकृत्य चिरं जीवति भाग्यवान् ॥११५॥
वियदग्नियुतं दीर्घषट्वाद्यं तारसम्पुटम् ।

लिखते हैं। सुवर्ण की कलम से सुन्दर भोजपत्र पर अष्टदल कमल निर्मित कर, उसके कर्णिका में साध्यशत्रु का नाम लिखे, और कमल के अष्टदल में अष्टाक्षर मन्त्र लिखकर, उसे माला मन्त्र से वेष्टित करे। उसके बाहर मालामन्त्र 'ह्रीं' बीज से वेष्टित कर, उसकी प्राणप्रतिष्ठा करे। तत्पश्चात् गोरोचन, कुंकुम तथा कनक से वेष्टित अर्थात् चारों तरफ से घुमाकर उस यन्त्र को भुजा एवं मस्तक पर धारण करे। इस प्रकार करने पर साधक युद्ध में निश्चय ही विजय प्राप्त करता है। तथा जुआ खेलने में उसकी जीत होती है। और क्रूरग्रह, विघ्न, विष, शस्त्र और चोर आदि से वह कभी भी तिरस्कृत नहीं होता। तथा समस्त रोगों को नष्ट कर चिरकाल पर्यन्त सौभाग्य भोग का उपभोग करता हुआ वह जीवित रहता है ॥१११-११५॥ 'ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॐ' यह अष्टार्ण मन्त्र है। इसके बाद माला मन्त्र का निरूपण करते हैं :

१. 'द्यूते' इत्यर्थः।

[१]अष्टार्णमन्त्रः संख्यातो मालामन्त्रोऽथ कीर्त्यते ॥११६॥
वज्रकाय वज्रतुण्ड कपिलेत्यथ पिङ्गल ।
ऊर्ध्वकेश महावर्ण बल रक्तमुखेति च ॥११७॥
तडिज्जिह्व महारौद्र दंष्ट्रोत्कटकहद्वयम् ।
करालिने महादृढ-प्रहारिन्निति वर्णकाः ॥११८॥
लङ्केश्वरवधायान्ते महासेतुपदं ततः ।
बन्धान्ते च महाशैल-प्रवाह-गगनेचर ॥११९॥
एह्येहि भगवन्नन्ते महाबलपराक्रम ।
भैरवाज्ञापयैह्येहि महारौद्रपदं पुनः ॥१२०॥
दीर्घपुच्छेन वर्णान्ते वेष्टयान्ते तु वैरिणम् ।
जम्भय-द्वितयं हुं फट् प्रणवादिः समीरितः ॥१२१॥
बाण-नेत्रेन्दु-वर्णोऽयं मालामन्त्रोऽखिलेष्टदः ।
युद्धे जप्तो जयं दद्यात् व्याधौ व्याधिविनाशनः ॥१२२॥

'ॐ वज्रकाय वज्रतुण्डाय कपिलपिङ्गलाय ऊर्ध्वकेशाय महाबलाय रक्तमुखाय तडिज्जिह्वाय महारौद्राय दंष्ट्रोत्कटाय हहकरालिने महादृढप्रहारिणे लंकेश्वरवधाय महासेतुबन्धाय महाशैलप्रवाहाय गगनेचराय एह्येहि भगवते महाबद्धपराक्रमाय भैरवाज्ञापयाऽऽज्ञापय एह्येहि महारौद्राय दीर्घपुच्छाय वेष्टय-वेष्टय वैरिणं भञ्जय-भञ्जय हुं फट्' यह एक सौ पचीस वर्ण वाला माला मन्त्र है। इस मालामन्त्र के जप करने से युद्ध में विजय तथा रोगी का रोग नष्ट होता है ॥११६-१२२॥ अष्टार्ण एवं माला मन्त्र का

१. 'ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॐ' इत्ययमष्टार्णो मन्त्रः ज्ञेयः ।

अष्टार्णमालामन्वोस्तु मुन्याद्यर्चा तु पूर्ववत् ।
भूरिणा किमिहोक्तेन सर्वं दद्यात् कपीश्वरः ।।१२३।।

इति पण्डितश्रीशिवदत्तमिश्रशास्त्रिविरचिते हनुमद्-रहस्ये
मन्त्रमहोदधिप्रोक्तं हनुमत्पटलं समाप्तम् ।

*

विधिवत् पूर्वोक्त प्रकार पूजन करने से समस्त इष्ट सिद्धि निश्चय ही श्रीहनुमान् जी की कृपा से प्राप्त होती है, इस विषय में अधिक कहना व्यर्थ है ।। १२३ ।।

इस प्रकार पण्डितश्रीशिवदत्तमिश्रशास्त्रिविरचित हिन्दीव्याख्यासहित
हनुमद्-रहस्य में मन्त्रमहोदधिप्रोक्त हनुमत्पटलम् समाप्त ।

हनुमत्कवचम् [१]

नारद उवाच

एकदा सुखमासीनं शङ्करं लोकशङ्करम् ।
पप्रच्छ गिरिजा कान्तं कर्पूरधवलं शिवम् ॥ १ ॥

पार्वत्युवाच

भगवन् ! देवदेवेश ! लोकनाथ ! जगत्प्रभो ! ।
शोकाकुलानां लोकानां केन रक्षा भवेद् [१]भव ॥ २ ॥
सङ्ग्रामे सङ्कटे घोरे भूत-प्रेतादिके भये ।
दुःख-दावाग्नि-सन्तप्तचेतसां दुःखभागिनाम् ॥ ३ ॥

ईश्वर उवाच

शृणु देवि! प्रवक्ष्यामि लोकानां हितकाम्यया ।
विभीषणाय रामेण कथितं कवचं पुरा ॥ ४ ॥
कवचं कपिनाथस्य वायुपुत्रस्य धीमतः ।

नारद जी ने कहा—किसी समय कपूर के समान अत्यन्त शुभ्र-वर्ण वाले, लोक का कल्याण करने वाले, तथा सुख से बैठे हुए, अपने स्वामी भगवान् शंकर से पार्वती ने पूछा ॥ १ ॥

पार्वती ने कहा—हे देवदेवेश ! हे लोकनाथ ! हे जगत्प्रभो ! हे भगवन् ! संग्राम, घोर संकट, तथा भूत-प्रेतादिकों के द्वारा उत्पन्न भय में पड़े हुए सन्तप्त चित्त वाले मनुष्यों की रक्षा किस स्तोत्र से होती है ? ॥ २-३ ॥

ईश्वर ने कहा—हे देवि ! लोक के कल्याण की कामना से भगवान् राम ने अत्यन्त बुद्धिमान् कपिराज वायुपुत्र का, जो कवच

---

१. 'ध्रुवम्' इति पाठान्तरम् ।

गुह्याद् गुह्यं प्रवक्ष्यामि विशेषात्तव सुन्दरि ! ॥ ५ ॥

विनियोगः—ॐ अस्य श्रीहनुमत्कवचस्तोत्रमन्त्रस्य श्रीरामचन्द्रऋषिः, श्रीवीरो हनुमान् परमात्मा देवता, अनुष्टुप्-छन्दः, मारुतात्मज इति बीजम्, अञ्जनीसूनुरिति शक्तिः, लक्ष्मणप्राणदाता इति जीवः, श्रीरामभक्तिरिति कवचम्, लङ्काप्रदाहक इति कीलकम्, मम सकलकार्यसिद्ध्यर्थे जपे विनियोगः ।

मन्त्रः—ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ।

करन्यासः—ॐ ह्रां अङ्गुष्ठाभ्यां नमः । ॐ ह्रीं तर्जनीभ्यां नमः । ॐ ह्रूं मध्यमाभ्यां नमः । ॐ ह्रैं अनामिकाभ्यां नमः । ॐ ह्रौं कनिष्ठिकाभ्यां नमः । ॐ ह्रः करतलकरपृष्ठाभ्यां नमः ।

हृदयादिन्यासः—ॐ अञ्जनीसूनवे नमो हृदयाय नमः । ॐ रुद्रमूर्तये नमः शिरसे स्वाहा । ॐ वातात्मजाय नमः शिखायै

विभीषण को प्रदान किया था, तथा जो अत्यन्त गोपनीय है, उस कवच को मैं तुमसे कहता हूँ ॥ ४-५ ॥

विनियोग—हाथ में जल लेकर, 'ॐ अस्य श्रीहनुमत्कवचस्तोत्रमन्त्रस्य' से लेकर 'जपे विनियोगः' तक वाक्य पढ़कर भूमि पर जल छोड़ दे ।

मन्त्र—'ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः' ।

करन्यास—'ॐ ह्रां' इस मन्त्र से दोनों अँगूठे, 'ॐ ह्रीं' मन्त्र से दोनों तर्जनी अंगुलि, 'ॐ ह्रूं' मन्त्र से दोनों मध्यमा अंगुलि, 'ॐ ह्रैं' इससे दोनों अनामिका अंगुलि का, 'ॐ ह्रौं' मन्त्र से दोनों कनिष्ठिका तथा 'ॐ ह्रः' इस मन्त्र से दोनों हाथ के तलवे तथा पृष्ठ भाग का स्पर्श करे ।

हृदयादिन्यास—'ॐ अंजनीसूनवे नमो हृदयाय नमः' से हृदय,

वषट्, ॐ श्रीरामभक्तिरताय नमः कवचाय हुम्। ॐ वज्र-कवचाय नमो नेत्रत्रयाय वौषट्। ॐ ब्रह्मास्त्रनिवारणाय नमः अस्त्राय फट्।

ध्यानम्

ध्यायेद् बालदिवाकरद्युतिनिभं देवारिदर्पापहं
देवेन्द्रप्रमुख-प्रशस्तयशसं देदीप्यमानं रुचा।
सुग्रीवादि समस्तवानरयुतं सुव्यक्ततत्त्वप्रियं
संरक्तारुणलोचनं पवनजं पीताम्बरालङ्कृतम्॥ ६॥
उद्यन्मार्तण्डकोटि-प्रकटरुचियुतं चारुवीरासनस्थं
मौञ्जी-यज्ञोपवीता-ऽऽभरण-रुचिशिखा-शोभितं कुण्डलाढ्यम्।

'ॐ रुद्रमूर्त्तये नमः शिरसे स्वाहा' इस मन्त्र से शिर, 'ॐ वातात्मजाय नमः शिखायै वषट्' इस मन्त्र से शिखा, 'ॐ श्रीरामभक्तिरताय नमः कवचाय हुम्' इस मन्त्र से दोनों बाहुओं का, 'ॐ कवचाय नमो नेत्रत्रयाय वौषट्' इस मन्त्र से दोनों नेत्रों का स्पर्श करे तथा 'ब्रह्मास्त्रनिवारणाय नमः अस्त्राय फट्' इस मन्त्र से अपने चारों ओर चुटकी बजावे।

तदनन्तर नीचे लिखे मन्त्र से ध्यान करे—

ध्यान—उदय होते हुए बाल सूर्य के समान कान्ति वाले, राक्षसों के गर्व को दूर करने वाले, देवताओं में प्रमुख, उत्तम कीर्ति वाले, तेज से देदीप्यमान, सुग्रीवादि वानरों से युक्त, ब्रह्मतत्त्व का साक्षात् करने वाले, रक्त एवं अरुण नेत्र वाले, पीताम्बर से अलंकृत श्री हनुमान् जी का ध्यान करे॥ ६॥ उदय होते हुए करोड़ों सूर्य के समान कान्ति वाले, वीरासन से विराजमान, मौंजी तथा यज्ञोपवीतरूप आभरण को अत्यन्त स्नेह से धारण करने वाले, तथा कुण्डलों से सुशोभित एवं प्रतिदिन भक्तों के अभीष्ट

भक्तानामिष्टदान-प्रवणमनुदिनं वेदनादप्रमोदं
[1]ध्यायेद्देवं विधेयं प्लवगकुलपतिं गोष्पदीभूतवार्धिम् ॥७॥
मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शरणं प्रपद्ये ॥८॥
वज्राङ्गं पिङ्गकेशाढ्यं स्वर्णकुण्डल-मण्डितम् ।
उद्यद्दक्षिण-दोर्दण्डं हनुमन्तं विचिन्तये ॥९॥
स्फटिकाभं स्वर्णकान्तिं द्विभुजं च कृताञ्जलिम् ।
कुण्डलद्वय-संशोभि-मुखाम्भोजं हरिं भजे ॥१०॥
उद्यदादित्य-सङ्काशमुदारभुज-विक्रमम् ।
कन्दर्प-कोटि-लावण्यं सर्वविद्याविशारदम् ॥११॥

प्रदान करने में निपुण, वेदों के शब्द से अपार हर्ष वाले, वानरों के अधिपति तथा समुद्र को गोपद के समान अनायास उल्लंघन करने वाले ऐसे हनुमान् जी का ध्यान करे ॥ ७ ॥ मन एवं पवन के समान अतिशीघ्रगामी, जितेन्द्रिय, बुद्धिमानों में श्रेष्ठ तथा वानरों के मुख्य सेनापति, वायुपुत्र, रामदूत, श्रीहनुमान् की मैं शरणागत हूँ ॥ ८ ॥ जिनका शरीर वज्र के समान कठोर है, केश पीला है, जो स्वर्ण कुण्डल से सुशोभित हैं, जिनका दाहिना हाथ ऊपर को उठा हुआ है, ऐसे हनुमान् जी का मैं ध्यान करता हूँ ॥ ९ ॥ स्वच्छस्फटिक के समान कान्ति वाले, स्वर्ण के समान देदीप्यमान, दो भुजा वाले, अंजलि बाँधे हुए तथा जिनका मुखमण्डल कुण्डलों से सुशोभित है, उन हनुमान् जी का मैं ध्यान करता हूँ ॥ १० ॥ उदय होते हुए सूर्य के समान प्रभा वाले, उदार तथा भुजाओं से पराक्रम दिखाने वाले, करोड़ों कामदेव के समान सुन्दर, सभी विद्याओं

१. 'ध्यायेदेवं' इत्यपि क्वचित्पाठः ।

श्रीरामहृदयानन्दं भक्तकल्पमहीरुहम् ।
अभयं वरदं दोर्भ्यां कलये मारुतात्मजम् ॥१२॥
अपराजित!नमस्तेऽस्तु नमस्ते रामपूजित ! ।
प्रस्थानं च करिष्यामि सिद्धिर्भवतु मे सदा ॥१३॥
यो वाराम्निधिमल्प-पल्वलमिवोल्लङ्घ्यप्रतापान्वितो
वैदेहीघनशोक-तापहरणो वैकुण्ठभक्तप्रियः ।
अक्षाद्यूर्जित-राक्षसेश्वरमहादर्पापहारी रणे
सोऽयं वानरपुङ्गवोऽवतु सदा चाऽस्मान् समीरात्मजः ॥१४॥
वज्राङ्गं पिङ्गनेत्रं कनकमयलसत्-कुण्डलाक्रान्तगण्डं
सर्वविद्याधिनाथं करतलविधृतं पूर्णकुम्भं दृढं च ।

में विशारद, श्रीहनुमान् जी का मैं ध्यान करता हूँ ॥ ११ ॥ श्री राम के हृदय को आनन्दित करने वाले, भक्तों के अभीष्ट पूर्ति के लिए कल्पवृक्ष, अपने भुजाओं से अभयप्रदान करने वाले, वरदाता, वायुपुत्र श्री हनुमान् जी का मैं ध्यान करता हूँ ॥१२॥ हे अपराजित, हे रामपूजित, मैं तुम्हें नमस्कार करता हूँ। मैं शत्रुओं के विजय के लिए प्रस्थान कर रहा हूँ। सर्वदा मेरा कार्य सिद्ध हो ॥ १३ ॥

अपार समुद्र को छोटे गड्ढे के समान लाँघने वाले, अत्यन्त पराक्रमशील, वैदेही के अपार शोक-ताप को हरण करेने वाले, मर्यादा पुरुषोत्तम भगवान् राम के अत्यन्त प्रिय, संग्राम में महाबली, अक्षयकुमार एवं रावणके अभिमान को भी नष्ट करनेवाले, वायु-पुत्र, वानरों में श्रेष्ठ, श्री हनुमान् जी हम लोगों की रक्षा करें ॥१४॥ वज्र के समान कठोर शरीर वाले, पिंगल (भूरे) नेत्र वाले, कनकमय कुण्डलों से सुशोभित गण्डस्थल वाले, सम्पूर्ण विद्याओं के अधिपति, हाथ में दृढता से अमृत संयुक्त पूर्ण कुम्भ धारण करनेवाले,

भक्ताभीष्टाधिकारं विदधति च सदा सुप्रसन्नं कपीन्द्रं
त्रैलोक्यत्राणकारं सकलभुवनगं रामदूतं नमामि ॥१५॥
उद्यल्लाङ्गूलकेश-प्रचलजलधरं भीममूर्तिं कपीन्द्रम् ।
वन्दे रामाङ्घ्रिपद्म-भ्रमरपरिवृतं सत्त्वसारं प्रसन्नम् ॥१६॥
वामे करे वीरभयं वहन्तं शैलं च धत्ते निजकण्ठलग्नम् ।
उद्यानमुत्थाय सुवर्णवर्णं भजे ज्वलत्कुण्डलरामदूतम् ॥१७॥
पद्मरागमणि-कुण्डल-त्विषा पाटलीकृत-कपोलमण्डलम् ।
दिव्यगेह-कदलीवनान्तरे भावयामि पवमाननन्दनम् ॥१८॥

भक्तों के अभीष्ट सिद्धि करने वाले, सदैव प्रसन्न रहने वाले, वानरों में मुख्य, त्रैलोक्य-रक्षा में समर्थ, अबाध गति से सम्पूर्ण विश्व में गमन करने वाले, रामदूत हनुमान् जी को मैं नमस्कार करता हूँ ॥१५॥ मेघपर्यन्त स्पर्श करने वाली लम्बी पूछ को हिलाने वाले, भीम काय, श्री रामचरणरूपी कमल के भ्रमर, अत्यन्त बलवान्, सदैव प्रसन्न रहने वाले, श्री हनुमान् जी का मैं ध्यान करता हूँ ॥ १६ ॥

बाँयें हाथ में कण्ठ से लगे हुए वीरों को भय प्रदान करने वाले, पर्वत को धारण किये हुए तथा वैद्य सुषेण द्वारा निर्दिष्ट दाहिने हाथ से देदीप्यमान सुवर्ण वर्ण के स्वयं प्रज्वलित संजीवनी बूटी के उद्यान को उठाये हुए, जगमगाते कुण्डल धारण किये हुए, श्रीरामदूत का मैं ध्यान करता हूँ ॥ १७ ॥ पद्मरागमणि के द्वारा बने हुए कुण्डल की कान्ति से अपने गण्डस्थल को गुलाब के समान रक्त वर्ण बनाने वाले, कदलीवन के दिव्य गृह में निवास करने वाले, पवनात्मज श्री हनुमान् जी का मैं ध्यान करता हूँ ॥ १८ ॥

ॐ ऐं ह्रीं हनुमते रामदूताय शाकिनी-डाकिनी विध्वंसनाय किल-किल वामकरेण निषण्णाय हनुमद्देवाय ॐ ह्रीं श्रीं ह्रौं ह्रां स्वाहा ।

मन्त्रः—ॐ नमो भगवते हनुमदाख्यरुद्राय सर्वदुष्टजनमुख-स्तम्भनं कुरु कुरु ह्रां ह्रीं ह्रूं ठंठंठं हुं फट् स्वाहा ।

ॐ नमो हनुमते अञ्जनीगर्भसम्भूताय रामलक्ष्मणानन्द-कराय कपिसैन्यप्रकाशनाय पर्वतोत्पाटनाय सुग्रीवामात्याय रणपरोद्घाटनाय कुमारब्रह्मचारिणे गम्भीरभीमशब्दोदयाय ॐ ह्रां ह्रीं ह्रूं सर्वदुष्टनिवारणाय स्वाहा ।

ॐ नमो हनुमते सर्वग्रहान् भूत-भविष्यद्-वर्तमानान् दूर-स्थान् समीपस्थान् सर्वकाल-दुष्टबुद्धीनुच्चाटयोच्चाटय परबलानि क्षोभय-क्षोभय मम सर्वकार्याणि साधय-साधय ॐ ह्रां ह्रीं ह्रूं फट् देहि-देहि स्वाहा । शिवं सिद्धिं ह्रूं ह्रीं ह्रीं स्वाहा ।

ॐ नमो हनुमते परकृत-यन्त्र-मन्त्र-पराहङ्कार-भूत-प्रेत-पिशाच-परदृष्टि-सर्वविघ्न-दुर्जनचेटकविद्या-सर्वग्रहभयं निवारय-निवारय वध-वध पच-पच दल-दल विचुलु-विचुलु किलु-किलु सर्वयन्त्राणि कुरुष्व वाचं ॐ फट् स्वाहा ।

ॐ नमो हनुमते पाहि-पाहि एहि-एहि सर्वग्रहभूतानां शाकिनी-डाकिनीनां विषमदुष्टानां सर्वविषयानाकर्षय-सर्वविष-यानाकर्षय मर्दय-मर्दय छेदय-छेदय अपमृत्युं ममोपशोषय-अपमृत्युं

पुनः 'ॐ ऐं ह्रीं' से आरम्भ कर 'हनुमदाज्ञा स्फुरेत् स्वाहा' तक मन्त्रों का पाठ कर पूर्वोक्त प्रकार से हनुमान् जी का ध्यान करे ।

ममोपशोषय ज्वल-ज्वल प्रज्वल-प्रज्वल भूतमण्डलं पिशाचमडलं निरासय-निरासय भूतज्वर-प्रेतज्वर-चतुर्थज्वर-विषमज्वर-महेश-ज्वरान् छिन्धि-छिन्धि भिन्धि-भिन्धि अक्षिशूल-पक्षशूल-शिरोऽभ्यन्तरशूल-गुल्मशूल-पित्तशूल-ब्रह्मराक्षसकुल-परबल-नाग-कुलविषं निर्विषं फट् ॐ सर्वदुष्टग्रह-निवारणाय स्वाहा ।

ॐ नमो हनुमते पवनपुत्राय वैश्वानरमुखाय पापदृष्टि-घोरदृष्टि-हनुमदाज्ञा स्फुरेत् स्वाहा ।

[कवचम्] श्री राम उवाच

हनुमान् पूर्वतः पातु दक्षिणे पवनात्मजः ।
पातु प्रतीच्यां रक्षोघ्नः पातु सागरपारगः ॥ १९ ॥
उदीच्यामूर्ध्वगः पातु केसरीप्रियनन्दनः ।
अधस्ताद् विष्णुभक्तस्तु पातु मध्यं च पावनिः ॥ २० ॥
अवान्तरदिशः पातु सीताशोकविनाशनः ।
लङ्काविदाहकः पातु सर्वापद्भ्यो निरन्तरम् ॥ २१ ॥
सुग्रीवसचिवः पातु मस्तकं वायुनन्दनः ।

श्री राम ने कहा—पूर्व की ओर हनुमान्, दक्षिण की ओर पवनात्मज, पश्चिम की ओर रक्षोघ्न, तथा उत्तर की ओर सागर-पारग, ऊपर की ओर केसरीनन्दन, नीचे की ओर विष्णुभक्त, मध्य में पावनि, अवान्तर दिशाओं में सीताशोक-विनाशन तथा समस्त आपत्तियों से निरन्तर लंकाविदाहक हमारी रक्षा करें ॥ १९-२१ ॥

सुग्रीव सचिव मेरे मस्तक की, वायुनन्दन भाल की, तथा

भालं पातु महावीरो भ्रुवोर्मध्ये निरन्तरम् ॥ २२ ॥
नेत्रे च्छायापहारी च पातु नः प्लवगेश्वरः ।
कपोले कर्णमूले च पातु श्रीरामकिङ्करः ॥ २३ ॥
नासाग्रमञ्जनीसूनुः पातु वक्त्रं हरीश्वरः ।
वाचं रुद्रप्रियः पातु जिह्वां पिङ्गललोचनः ॥ २४ ॥
पातु दन्तान् फाल्गुनेष्टश्चिबुकं दैत्यपादहा ।
पातु कण्ठं च दैत्यारिः स्कन्धौ पातु सुरार्चितः ॥ २५ ॥
भुजौ पातु महातेजाः करौ तु चरणायुधः ।
नखान् नखायुधः पातु कुक्षिं पातु कपीश्वरः ॥ २६ ॥
वक्षो मुद्रापहारी च पातु पार्श्वे भुजायुधः ।
लङ्काविभञ्जनः पातु पृष्ठदेशे निरन्तरम् ॥ २७ ॥

महावीर भौंह के मध्य में निरन्तर रक्षा करें ॥ २२ ॥ छायापहारी (सिंहिका का वध करने वाले) नेत्रों की, प्लवगेश्वर कपोलों की तथा श्री रामकिंकर कर्णमूल की रक्षा करें ॥ २३ ॥

अंजनीसूनु नासाग्र की, हरीश्वर मुख की, रुद्रप्रिय वाणी की, तथा पिंगललोचन हमारी जीभ की रक्षा करें ॥ २४ ॥ अर्जुन के विजय रथ की ध्वजा में स्थित फाल्गुनेष्ट दाँतों की, दैत्यों को पैर से मारने वाले दैत्यपादहा चिबुक की, दैत्यारि कण्ठ की, तथा देवता से पूजित सुरार्चित मेरे दोनों कन्धों की रक्षा करें ॥२५॥ महातेजस्वी महातेजा भुजाओं की, चरणायुध दोनों हाथों की, नखायुध सभी नखों की, तथा कपीश्वर कुक्षिभाग (कोख) की रक्षा करें ॥ २६ ॥ मुद्रापहारी (श्री राम की अँगूठी रखने वाले) वक्षःस्थल की, भुजायुध अगल-बगल की, तथा लंका का नाश करने वाले लंकाविभंजन निरन्तर मेरे पृष्ठदेश (पीठ) की रक्षा करें ॥ २७ ॥

नाभिं च रामदूतस्तु कटिं पात्वनिलात्मजः ।
गुह्यं पातु महाप्राज्ञो लिङ्गं पातु शिवप्रियः ॥ २८ ॥
ऊरू च जानुनी पातु लङ्काप्रासादभञ्जनः ।
जङ्घे पातु कपिश्रेष्ठो गुल्फौ पातु महाबलः ॥ २९ ॥
अचलोद्धारकः पातु पादौ भास्करसन्निभः ।
अङ्गान्यमितसत्त्वाढ्यः पातु पादाङ्गुलीस्तथा ॥ ३० ॥
सर्वाङ्गानि महाशूरः पातु रोमाणि चात्मवान् ।
हनुमत्कवचं यस्तु पठेद् विद्वान् विचक्षणः ॥ ३१ ॥
स एव पुरुषश्रेष्ठो भुक्ति मुक्ति च विन्दति ।
त्रिकालमेककालं वा पठेन्मासत्रयं सदा ॥ ३२ ॥
सर्वान् रिपून् क्षणाज्जित्वा स पुमान् श्रियमाप्नुयात् ।
मध्यरात्रे जले स्थित्वा सप्तवारं पठेद् यदि ॥ ३३ ॥

